का॰ श्री॰ १

ॐ नमः शारदायै ॥ सिन्दूररक्तकुङ्कुमद्रुमाशनविद्रुमार्करक्ताब्जदाडिमनिभाय चतुर्भुजाय हेरम्बभैरवगणेश्वरना
यकाय सर्वार्थसिद्धिफलदाय नमोऽस्तु तस्मै । सृष्टिस्थितिलयहेतुं जगतामजमीश्वरं प्रणम्याहम् लोकव्यवहा
रार्थं गणितं संक्षेपतो वक्ष्ये । जगतां भुवनानां भूर्भुवःस्वर्लक्षणानां त्रयाणां जनमहस्तपःसत्याख्यैः सह वा सप्तानां
कालाग्निरुद्रभुवनाद्यारभ्याशिवावधिभुवनाध्वपरिगणितानां ये सृष्टिस्थितिलया उत्पत्तिव्यवस्थानविध्वंसा निर्मा
णपालनसंहारा वा निर्माणावस्थानविध्वंसाः एवं वा तेषां हेतुं यथायोगं कर्तारं प्रवर्तयितारं निमित्तं वा तथा अजं
जन्मरहितम् अर्थात् स्थितिविनाशरहितं महासत्ताख्यनिजस्थितिमन्तं यावत्संभविपदार्थसार्थगर्भजगदवस्था
त्रयस्य तदधीनत्वात् परिशेषाभावात् स्वात्मनि प्रसंभवाद्विधातारं एवमपि अनादिसिद्धा-- वात्सल्यधीयां तद्विपरी
तमीश्वरं परमकारुणिकत्वेन प्राप्ते काले तेषामपि निवारयितुं प्रभुं प्रणम्य नमस्कृत्याहं श्रीधराचार्यः लोकानां
व्यवहारार्थं गणितं पाटीरूपं संक्षेपतो ग्रन्थलाघवमाश्रित्य वक्ष्ये कथयिष्ये संक्षेपतः स्वल्पतोऽनेकगणितानन्तसं १

२१५।२८८।२८।।२ अनेन २५ ५ मितित्रियाभेदाजात्याश्रयाः पृथक्। एकभेदास्त्रयोदशद्विभेदा प्रत्युत्पन्नमित्यादि
यावत् त्रयोदशभेदपर्यन्तमिति। प्रमाणफलेच्छाख्यैस्त्रिभिः राशिभिर्भवतीति त्रैराशिकम्। तच्चद्विविधमन्तरव्याहृति
हीनमितरच्च मानयोर्न्यूनाधिकयोरेकतरेणमानेन स्थानसंख्यैर्व्यस्तवस्तुनः इतरेणस्थानमिच्छामानान्तरं त्रिभिरेवराशि
भिः प्रमाणफलेच्छाख्यैः संभवात्त्रैराशिकमेवसत् आद्यन्तयोः समानजातीयत्वाद्व्यस्तत्वव्यस्तत्रैराशिकम्। पंचभिः स
प्तभिर्नवभिरिति राशिभिर्भवं पंचराशिसप्तराशिनवराशि स्थानमूल्यादिनाभाण्डेनस्थानमूल्यादिनएवभाण्डान्तरस्यपरि
वर्तग्रहणेच्छायां इयताकियदिति भाण्डप्रतिभाण्डकं जीवस्यविक्रियोजीवविक्रियः यत्रवयसावृद्धोमूल्यमपची
यते जीवस्यआयुषोहानिर्वयसस्तु अत्यये स्वभूतस्यआयुषोभावसंभावनान्मूल्यंच वृद्धंभवति द्व्यसेति गुणभागहारस्या
ननियमाद्गुणितकर्मप्रक्रमस्थानार्थत्वान्यपरिकर्माणि ॥ इयताकालेनइयतः प्रयुक्तधनस्यइयान्लाभ इत्येवंकालविशेषेण
धनविशेषस्यलाभविशेषंनियम्याज्ञातधनंप्रयुक्तंतत्कालेधनंलाभसहितमानीयतेश्रेणीनाम्नाकिंत यथैकेनमासे

क॰
श्री॰
८

नष्टानस्यलाभः पंचेतिव्यवस्थयाश्वस्तनधनंशतमुक्तंतद्द्वादशभिर्मासैरानीयलाभसहितंशतद्वयंहृष्टंयथाषण्णवतिस्तत्र
नत्रायनेकियन्मूलंमासीयस्तनयाव्यवस्थयासमुवित्तलाभसहितस्यवर्षेणैवषण्णवतिर्मिश्रंभवतीतिमूललाभवि
भागानयनंतथान्येषामपिनानाविधानांमिश्राणामभिमतविभागपरिज्ञानंयच्चक्रियतेतन्मिश्रकम् आद्युत्तरपदात्मिकाश्रेढी
ल्यविस्तारा उपरिमहाविस्तारा भूमवाह्यतिः क्षेत्रविशेषः ‒ श्रेढी क्षेत्रंदशविधं यत्रचतुरस्रंपंचप्रकारं समचतुरस्रं
त्रिसमचतुरस्रंद्विसमचतुरस्रं विषमचतुरस्रं आयतचतुरस्रमिति त्र्यस्रंत्रिप्रकारं समत्र्यस्रं द्विसमत्र्यस्रं विषमत्र्यस्र
मिति वृत्तमेकविधं चापंच एवमेतद्दशभेदाः अन्यानिजगदन्तनेमिबालेन्दुयववज्रषडष्टाश्रिप्रभृतीनिक्षेत्राणि
यथासंभवंसमुद्दिष्टक्षेत्रदशकल्पनयासाधितफलानितदिदंक्षेत्रं आयामविस्तारतलवत्त्वात्त्रिविषमः खातंक्षेत्र
वदेवकिंतुआयामविस्तारतलवत्त्वात्त्रिराशिस्तत्रत्र्यस्रघनस्यैवविषयः चितिः आयामविस्तारविष्कम्भात्मकत्वात्
खातसदृशासदृशत्रिराशिविषयएव क्राकचाः कटपत्रिकाः तेषांव्यवहारः ऊर्ध्वच्छेदेविस्तारायामवान् तिर्यक्छे

देविस्तारविष्कम्भवान् बहुतिर्यक्के दीपितया तत्रापि दारुविशेषात्श्रयात्रविशेषः राशिः मूलपरिधिसमुच्छ्रायगुणितः
तदनुसारं ज्ञेयद्रव्यप्रमाणः तत्रापि द्रव्यविशेषात्प्रमाणविशेषनियमनम् छायापरिधिप्रदेशसंख्यादिनावरोध
तद्धीनप्रदेशकास्यं तदनुसारेण शृङ्गदीपायत्तत्वलाभः सूक्ष्मतत्त्वं सूक्ष्मकल्पनाभिरकल्पषम् तत्त्वं पारमार्थ्यः तस्मा
त्त्रिलोकस्थितत्वाज्ज्ञानपर्यालोचनालभ्यत्वाच्चेति शास्त्राभिधेयोद्देशः ॥ एकदशशतमस्मात्सहस्रमयुतं ततः परं
लक्षम् प्रयुतं कोटिमथार्बुदमब्जं खर्वं निखर्वं च तस्मान्महासरोजं शंकुं सरितांपतिं ततस्त्वन्त्यम् मध्यं परार्धमाहुर्य
थोत्तरं दशगुणं तज्ज्ञाः ॥ एकं १ दश १० शतं १०० सहस्रं १००० अयुतं १०००० लक्षं १००००० प्रयुतं १०००००० कोटिः १०००००००
अर्बुदं १०००००००० अब्जं १००००००००० खर्वं १०००००००००० निखर्वं १००००००००००० महापद्मं १०००००००००००० शंकुः १०००
००००००००००जलधिः १०००००००००००००० अन्त्यं १००००००००००००००० मध्यं १०००००००००००००००० परार्धं १०००००००००००००
००००ह्येपरार्धे २००००००००००००००००० षोडशपणाः पुराणः पणो भवेत्काकिनीचतुष्केन पंचाहतैस्स्वगुणभिर्वराटकैः

का॰
श्री॰
५

काकिनीचैका विंशतिभिर्वराटकैः काकिनी तच्चतुष्टयेन पणः तैः षोडशभिः पुराणः ततश्च पुराणायदा पण
सहितास्तदा पणानामधः षोडशांके देयः पुराणः काकिनीयुक्ताश्चेत्तदा काकिण्यः चतुष्षष्टिच्छेदाः कार्याः एत
वतीभिरेताभिस्सहइति पौनस्तु काकिण्या युज्यमानाश्चतुश्छेदा एव एवमन्यदप्यूह्यं, माषाद्दशार्धगुंजः षोडशमाषा
निगद्यते कर्षः सुस्तुवर्णस्य सुवर्णस्तैरेव पलं चतुर्भिश्च। पंचभिर्गुंजाभिर्माषः तैः षोडशभिः कर्षः स एव सुवर्णसंब
न्धी सुवर्णसंज्ञः तैः कर्षैश्चतुर्भिः पलम्। खार्येका षोडशभिर्द्रोणैः चतुराढको भवेद्द्रोणः प्रस्थैश्चतुर्भिराढकः प्र
कः प्रस्थश्चतुष्कुडवः। एष चतुश्चातुर्थिकः तच्चतुष्टयेन कुडवः तच्चतुष्टयेन प्रस्थः तच्चतुष्टयेनाढकः तच्चतुष्टयेन
द्रोणः तैः षोडशभिः खारी इत्यनया कल्पनया द्वात्रिंशाङ्कुनपलप्रमाणा खारी भवति ततः षोडशभागः पलशतद्वयं
द्रोणः ततश्चतुर्भागः पंचाशत्पलानि आढकः ततश्चतुर्भागः पलद्वादशकं सार्धं प्रस्थः ततश्चतुर्भागः पलत्रयमष्टां
शश्च कुडवः तच्चतुर्भागः पंचविंशतिः द्वात्रिंशद्भागः चातुर्थिकः ततश्चतुर्भागः २५/१२८ एतेवस्तुयमत्रपञ्चेदास्तत्त्वप

लांशाः षोडशिका अथ यथाक्रममंकन्यासः खारीपलानि ३२०० द्रोणपलानि २०० आढकपलानि ५० प्रस्थपलानि १२॥
कुडवपलानि ३ चातुर्थिकपलानि ३५ षोडशिकापलानि २५। हस्तोंगुलविंशत्या चतुरन्वितया वा चतुष्करो दण्डः
तद्द्विसहस्रं क्रोशो ४ क्रोशैर्योजनमेकं चतुष्क्रोशेन। चतुर्विंशत्यंगुलैर्हस्तः तैश्चतुर्भिर्दण्डः तत्सहस्रद्वयेन क्रोशः तैश्चतुर्भिर्यो
जनम् भवति घटीनां षष्ट्याहोरात्रस्तैस्त्रिसंगुणैर्दशभिः मासो द्वादशभिस्तैर्वर्षं गणितेत्र परिभाषा। षष्टिर्घटिका अहोरात्रः
त्रिंशदहोरात्रो मासः द्वादशमासा वर्षम् इत्येवं देशान्यतः प्रभृति गणितेत्र परिभाषा संख्यांकस्थापनसंज्ञाः द्रव्यदेशका
लपरिच्छेदः त्रिविधं द्रव्यमानं गुरुत्वमानं गुंजमाषकर्षपलानि षोडशिकाचातुर्थिके कुडवप्रस्थाढकद्रोणखार्यादि ग्रा
यामविष्कम्भमानं अंगुलदण्डक्रोशयोजनादि भेदमानं काकिणीपणशाणादि देशस्य गुरुमानं काकिन्यादिमानं च ना
स्ति कालस्य त्रिगणनेनैव सत्त्वेन वषकादिमानेन स्थूलेन गुणादिमानेन च लोकव्यवहारो नास्तीति इह नोक्तः अनेकका
मतात् अव्यवस्थानमनादरान्नास्यतः॥ अनन्तरं यथोद्देशक्रमं संकलितादिविधयो निदर्श्यन्ते सैकपदाहतपदद्दलमे

क॰ कादिचयेनभवतिसंकलितम्।सहएकेनवर्तितंसैकम्एकसहितंएकगुणमेकेनाधिकीकृतंयत्पदंगच्छः अवधिःते
श्री॰ नाहतंगुणितंयत्पदंतस्यदलमर्धंतदेकाद्येकचयेनसंकलितंभवति एकाद्येकचये अनेकाद्येकचयेइदंकरणंनभवति
९ तत्रइदंचसामान्येनज्ञेयम्। व्येकपदार्धघ्नचयसमादिः पदसंगुणोभवेद्गणितमितिवक्ष्यति एकाद्येकचयेतुकर्मणिअनेना
6 नेप्रकारेणलाघवमस्तीतिपृथक्सूत्रारंभः कर्मलाघवार्थः एवंचभूयांसिसूत्राणिस्थितानि तद्यथाव्यपकलितेसैकंव्यप
कलितपदमित्यादिश्लोकाभ्यामितिसंकलितपदात्संकलितधनंव्यपकलितपदाच्चव्यपकलितधनमानीयान्तरंकृत्वाशेषंज्ञा
तंभवेत्तद्गौरवंतुस्यात् उदाहरणम् एकादिदशान्तानांसंकलितंकिंस्याद्दशगुणानाम् एकाद्येकचयेनदशसंकलितंस्यात्
देश्यात्र। एकादशगुणादश आदिग्रहणाद्द्वादयोगृह्यन्तेतेनदशगुणाः विंशतिः त्रिंशत् चत्वारिंशत् पंचाशत् षष्टिः स
प्ततिः अशीतिः नवतिः शतमितिभवंति एतेषांपदानामेकाद्येकोत्तरेणसंकलितंकिंस्यादितिप्रश्नवत्त्वंकथय तस्मात्पदंवा
सुइतिसंकलितात्पदानयनेप्रश्नार्थाद्वाक्यान्तरादाशुपदम् इहाभयप्रश्नेशेषत्वात्तस्यतेनशीघ्रंकथयेत्यर्थः एतत्करणसू

आरम्भसाफल्यमुत्पादयति करणस्त्वेतत्क्रमेण लघ्यादेरपि तावानेव श्रमलेशः यावान्द्वयोः संकलितानयने अ
भ्यस्त्रितक्रमेणवद्वयोः संकलितम् आदौ रूपं न्यस्य तदनन्तरं रूपद्वयं तत्रापि रूपस्य रूपयोश्च युतिरिति त्रीणि कर्माणि जा
न्येव तत्र क्रमेणैकं पदमित्येकं आहृतपदमिति द्वितीयं दलमिति तृतीयम् अथ इह पदस्यानमिति त्रीणि कर्माणि यु
तिश्चतुर्थं यदि वा रूपेण रूपद्वयस्य युतिस्तदा रूपरूपत्रययुतिरिति अत्र पंच कर्माणि भवंतीत्यस्मादेव प्रभृति करण
क्रमो लघुर्भवति अपि च भिन्नभागात्मके वा पदे संकलितस्यानयनमस्त्विति तस्यैव शंकां न यावद्धि रूपस्य तावद्रूपमेव सं
कलितं रूपार्धस्य किं संकलितमित्यपेक्षायां रूपार्धमेव स्यात् नैवं यावद्धि अर्धं १/२ सैकमिति सवर्णीकृतं रूपसहि
तं त्रयो द्विभागाः संपद्यंते ३/२ पदेन रूपार्धेन १/२ अनेन गुणितं भिन्नप्रत्युत्पन्नकर्मणा प्रत्युत्पन्नफलं स्यात् अंशवधच्छे
दघातसंभक्तः इत्यंशयोस्त्रिकैकयोर्वधः छेदयोर्द्विकैकयोर्घातेन ४ भक्तः त्रयश्चतुर्भागा जायंते ३/४ तेषां दलमिति
चतुर्भागत्रयेऽस्मिन् ३/४ दलिते अर्धेनानेन १/२ भिन्नप्रत्युत्पन्नकर्मणा गुणितेन त्रयोऽष्टभागा जायंते ३/८ आनुपा

क· श्री· ७

तिकस्य रूपार्धस्य पर्यवान्तरमष्टभागाः । नवाउपातिकउपपद्यते रूपार्धयोरपि परस्परं न्यूनाधिकधनत्वापपत्तेः । अ
न्यथा रूपार्धधनं तद्द्विगुणं रूपस्य तदन्तरेण द्वयोर्द्वयं स्यात्त्रयमिति तस्मात्करणं श्रेयः । उदाहरणानां क्रमेण प्रदर्श्यते ।
तद्यथा पदं १० सैकं ११ एतेनाहतस्य पदस्य १० एवं जातस्य ११० दलं ५५ एतद्दशानां संकलितं पदं २० सैकं २१ आहत
पदं ४२० दलं २१० पदं ३० सैकं ३१ आहतपदं ९३० दलं ४६५ पदं ४० सैकं ४१ आहतपदं १६४० दलं ८२०
पदं ५० सैकं ५१ आहतपदं २५५० दलं १२७५ पदं ६० सैकं ६१ आहतपदं ३६६० दलं १८३० पदं ७० सैकं ७१
आहतपदं ४९७० दलं २४८५ पदं ८० सैकं ८१ आहतपदं ६४८० दलं ३२४० पदं ९० सैकं ९१ आहतप
दं ८१९० दलं ४०९५ पदं १०० सैकं १०१ आहतपदं १०१०० दलं ५०५० द्विगुणीकृतसंकलितान्मूलं गच्छाव
शिष्टसमः । एकाद्येकचयेन संकलिते दृष्टे गच्छातपदानयनार्थोऽयमारम्भः द्विगुणीकृतसंकलितान्मूलं वर्गमूलं
गच्छः पदं भवति अनेकमूलसंभवे अवशिष्टसमं मूलं ग्राह्यम् अस्य संकलितस्य द्विगुणीकृतस्य सर्वं यातिरवशेषम्

लतानास्ति अतोमूलमित्युक्ते करणीत्वं प्रसज्येत यदुक्तं प्राह्यमूलाय मूलस्य करणीसंज्ञितो ऽभावपि ति नवतदिष्यते य
दिष्टासंज्ञं मूलं शेषेण तत स्वब्धा विदानिष्टप्रसंगः अथवा राशेर मूलदस्याहृतस्य वर्गेण वर्गेणकेनविन्महता मूलंशेषेण
विनाविभजेद्गुणवर्गमूलेनेति कर्मक्रियेत तदपिनेष्यतेएव। उदाहरणम् एकाद्येकोत्तरेणपंचपंचवा प्रान्संकलितपदे
इष्टेकिमस्यपदंस्यात् तेनाद्विगुणं ११ अतोमूला विषमात्पदं तत्त्यक्त्वा वर्गस्थानयुतेनमूलेन द्विगुणेनभजेच्छेषंल
ब्धंविनिवेशयेत्क्रयाम् तद्वर्गंसंशोध्याद्विगुणंकुर्वीतपूर्ववल्लब्धम् उत्सार्यततोविभजेच्छेषंद्विगुणीकृतंदलयेदितिकर्म
मूलप्रकारेणविषमात्पदं तदहृतावच्छेत्स्यस्यानादवर्गंत्यक्तेति रूपमेवसंभवितं वर्गंत्यक्त्वा तस्यवर्गस्यमूलेन रूपेणवस्या
नच्युतेनशतस्यानादशस्यानगतेनद्विगुणेन रूपद्वयेनांगतेन उपरितनंशुद्धवर्गशेषंराशिंभजेत नचेह दशस्थानगतेन
नरूपद्वयेन उपरितनस्यदशकान्त्यस्यरूपस्यभागइति शून्यमेवभागलब्धंभवति तच्चपंक्त्यांप्राकस्यापितंशुद्धवर्गस्यरू
लरूपस्याधः दितोविनिवेशयेत् उपरितनस्यराशेरेकस्यानाधइत्यर्थः येनाधोविंशतिर्जायते तस्यशून्यस्यपंक्तौस्थापितस्य

व· श्री· ८
8

वर्गस्थानमेवोपरिष्टात्संशोध्य राशिरविहृतः स्वयोजनापगमे इति विधिना द्विगुणं कुर्वीतेति शून्ये द्विगुणीकृतेपि शू
न्यतामपरित्यजत्येव एकस्यानादर्शनतो भावाडुत्सार्येत्यादिकमतिदृष्टौ अथः विंशतिं दलयेत् तेन दश भवंति उपरि
वदशैवावशिष्यंते एतदेकाद्युत्तरसंकलितस्य पंचपंचाशतः पदम् अन्त्यसंकलितं २१० द्विगुणं ४२० अतो मूलं २०
उपरिष्टात्तद्वर्गस्थानचतुष्टयं परित्यक्ताः वशिष्टा विंशतिरेव अन्त्यसंकलितं ४६५ द्विगुणं ९३० अतो मूलं ३० तद्वर्गस्थान
नवकस्थत्वे अवशिष्टं त्रिंशदेव ३० अन्त्यसंकलितं ८२० द्विगुणं १६४० स्थानषोडशके वर्गे त्यक्ते चत्वारिंशदवशिष्ट
सममेव अन्त्यत् १२७५ द्विगुणं २५५० अतः स्थानपंचविंशके वर्गे त्यक्ते शेषः पंचाशत् वर्गमूलं च पंचाशत् अन्त्यत् १८३०
द्विगुणं ३६६० अतः स्थानषट्त्रिंशके वर्गे त्यक्ते शेषः षष्टिः वर्गमूलं च षष्टिः अन्त्यत् २४८५ द्विगुणं ४९७० एकोनपंचा
शतत्कृत्वान्यपरस्य शेषं मूलं च सप्ततिः अन्त्यत् ३२४० द्विगुणं ६४८० अतो मूलशेषावशीतिः अन्त्यत् ४०९५ द्विगुणं
८१९० अतो मूलं शेषश्च नवतिः अन्त्यत् ५०५० द्विगुणं १०१०० अतो मूलं शेषश्च शतम् अनेन क्रमेण मूलानयेन सर्वं याव

शिष्टसममेव भवत्यवशिष्टग्रहणमनर्थकम् अथोच्यते अमूलदत्वात्करणीत्वादिति प्रसज्येतेति तर्हि आसन्नग्रहणमेव
मूलविशेषणं कार्यम् द्विगुणीकृतसंकलितान्मूलं गच्छः समासन्नमिति एवंविधेऽस्याने ह्यासन्नग्रहणं कृतमेव यथा
द्विचयधनाच्चयदलरहितादिष्टात्त्रिगुणात्समासन्नमूलमिति न यावद्राशेरमूलदस्याहतस्य वर्गेणकेनचिन्महता मूलं शे
षेणविनेति उच्यते अवशिष्टग्रहणं नियमार्थं तन्मूलं ग्राह्यं यद्वर्गेण शुद्धे शेषमूलयोः साम्यं भवतीति अन्यथाऽऽसन्नमूलग्रह
णे पदमनिष्टमापद्येत तथाहि नवभागौ द्वौ २/९ वा तस्य संकलितमिति द्विगुणं चत्वारो नवभागाः ४/९ मूलमिति अंशमूलं २
छेदमूलं ३ नचैतदिष्टं नहि द्वयोस्त्रिभागयोरेतत्संकलितं युक्तं सैकं ५/३ आहतपदं १०/९ दलितमिति ५/९ एतस्य संकलितस्य
युक्तत्वात् अस्यापि संकलितस्य शतीयं पदानयनेन द्विगुणमिति मूलमासन्नमूलमंशस्य ३ तदीयस्य वर्गस्य नवानां शुद्धिसंभ
वात् छेदमूलमपि ३ अंशस्य वर्गमूले छेदनमूलेनाहृते मूलमिति त्रयाणां त्रिभिर्भागहृत्यं फलं लभ्यते नचैतदिष्यते तस्मा
देवममूलदत्वेपि निरवशेषराशिमूलमित्यत्रासन्नमूलमनिष्टं यदा तु शेषसमं मूलं तदा चतुर्णां नवभागानां अंशस्य त्रय

क॰
श्री॰
९

9

वर्गो विशोध्यः रूपमेव शेषः २ छेदे नैव विशुद्धवर्गस्य रूपस्य मूलं रूपं छेदमूलेन त्रितयेन भक्तं त्रिभागो भवति शेषस्य त्रयाणां
नव भक्तानामपवर्तने त्रिभाग एवेति शेषमूलयोः साम्यं तात्त्विकं चेन्न तत्पदमिति ॥ पदगुणपदवर्गदलं संकलितं वा ॥ पूर्वेण
संकलितानयनेन सिद्धेऽपि सूत्रारम्भः फलप्राधान्यात्वार्थः येनैकेन विस्तरकारेणाचार्यैः फलमेवान्विष्टं न तु नियतः कश्चि
त्प्रकार आश्रितः पदस्य वर्गः पदगुणपदवर्गः पदेन गुणः पदगुणः तस्मै पदवर्गः पदगुणपदवर्गः तस्य दलं न तु पदेन
गुणं पदं पदगुणपदं तस्य वर्गस्तद्दलमिति पदगुणपदवर्गदलमिति संकलितं भवति पदेन गुणं पदगुणमिति यदि विवक्षि
तं स्यात्तदा द्विगुणपदे इति ब्रूयात् तदवक्तेस्तु पदगुणात्मकपदवर्गः पदशब्दः संबन्धमभिनीयते प्रयोज्यते पदगुणं पद
मिति तद्द्विगुणं पदमित्यर्थोऽविस्ताच्छङ्काः पदस्य संबंधि यत्पदं वर्गमूलं परमासन्नं करणीरूपं वा तेन गुणं तद्वर्गात्मकं सं
कलितापत्त्या पदद्वयपदे शंपदमित्यस्यार्थस्यान्याय्यत्वात् यथा पुत्रेण गुणः पुत्रगुणः पुत्रस्त्वत्र पुत्रसंबंधात्तन्नीयात्तः पुत्रशब्दः
पौत्र इति ज्ञायते न तु यस्य स पुत्रः तस्य पुत्रेणैव सहितः पुत्रः प्रातरादिति प्रतीतिः तर्हि परशणीसंकलितावादमात्रमेतत्
त

स्तत्रामितिनस्फुटाभिमतार्थसमर्पकं वाक्यमरचयन् नवाव्याख्यातृभिस्तत्र व्यवस्थापनाय युक्तिविमर्दः प्रतन्य
त इति। अथ पूर्वोक्तानां दशादीनां शतान्तानां संकलितार्थप्रकारान्तरेण कर्म। पदं १० तद्वर्गः १०० पदयुतः ११० द
लं ५५ पदं २० वर्गः ४०० पदयुतः ४२० दलं २१० पदं ३० तद्वर्गः ९०० पदयुतः ९३० दलं ४६५ पदं ४० तद्वर्गः
१६०० पदयुतः १६४० दलं ८२० पदं ५० तद्वर्गः २५०० पदयुतः २५५० दलं १२७५ पदं ६० तद्वर्गः ३६०० पदयु
तः ३६६० दलं १८३० पदं ७० तद्वर्गः ४९०० पदयुतः ४९७० दलं २४८५ पदं ८० तद्वर्गः ६४०० पदयुतः
६४८० दलं ३२४० पदं ९० तद्वर्गः ८१०० पदयुतः ८१९० दलं ४०९५ पदं १०० तद्वर्गः १०००० पदयुतः १०१००
दलं ५०५० ॥ तदष्टसंगुणितं। रूपयुतं तन्मूलं निरेकमर्धीकृतं गच्छः द्विगुणीकृतसंकलितादित्यादिना पदान
यने सिद्धेऽपि संकलितानयनार्थप्रकारान्तरप्रदर्शनवत्फलप्राधान्यख्यापनार्थः पुनरारम्भः अवशिष्टसाम्या
नुसरणखेदपरिहारार्थं वा तदेकाद्येकचयेन प्रकारद्वयोक्तसंकलितमष्टाभिर्गुणयित्वा रूपेणैकेन संयोज्य वर्ग

क· मूलेन विभज्य रूपहीनं कृत्वा दलयेत् एवमपि पदं लभ्यते यथा संकलितं ५५ अष्टगुणं ४४० रूपयुतं ४४१ मूलं
श्री· २१ निरेकं २० अर्धीकृतं १० सं २१० अष्टघ्नं १६८० सैकं १६८१ मूलं ४१ व्येकं ४० अर्धीकृतं २० सं ४६५ अष्टघ्नं
९· ३७२० सैकं ३७२१ मूलं ६१ व्येकं ६० अर्धीकृतं ३० सं ८२० अष्टघ्नं ६५६० सैकं ६५६१ मूलं ८१ व्येकं ८० द
लितं ४० सं १२७५ अष्टघ्नं १०२०० सैकं १०२०१ मूलं १०१ व्येकं १०० दलितं ५० सं १८३० अष्टघ्नं १४६४० सै
कं १४६४१ मूलं १२१ व्येकं १२० दलितं ६० सं २४८५ अष्टघ्नं १९८८० सैकं १९८८१ मूलं १४१ व्येकं १४०
दलितं ७० सं ३२४० अष्टघ्नं २५९२० सैकं २५९२१ मूलं १६१ व्येकं १६० दलितं ८० सं ४०९५ अष्टघ्नं ३२७६०
सैकं ३२७६१ मूलं १८१ व्येकं १८० दलितं ९० सं ५०५० अष्टगुणं ४०४०० सैकं ४०४०१ मूलं २०१ व्येकं २०० द
लितं १०० ॥ सैकं व्यपकलितपदं संकलितपदे निधाय संगुणयेत् पदयोर्विवरेण भवेद्दलीकृतं व्यपकलितशे
षम् ॥ संकलितासंकलितस्फुटज्ञेयशेषजिज्ञासायां यस्य संकलिताद्यस्य संकलितं शोध्यं तयोः पृथक् संकलि

10

तधने आनीयान्तरे क्रियमाणे प्रयत्नगौरवं स्यादिति एकेन तन्त्रेण करणार्थोयमारम्भः पदे द्वे संकलितपदं व्यापक
लितपदं च व्यापकलितमपि संकलितपदमेव तेन प्रकारेण संकलितधनस्य संकलितधनान्तरान्यातनार्थं किंतु शेष
जिज्ञासार्थत्वादस्य सूत्रस्य व्यापकलितशब्दस्य संकलितशब्दविशेष्यलाभः तेन व्यापकलितं पातितं यत्संकलितं।
तस्य पदं व्यापकलितपदं तत्सैकं संकलितपदं निधाय निक्षिप्य संकलितव्यापकलितपदयोर्विवरेण मध्येन विशे
षेण येयतः पतंति तत्कृति विशेषेण संगुणय वार्थोत्कृयतीन् एवं सति एकस्मात्संकलितादन्यसंकलितव्यापकलिते
पतिते पातिते वा शेषं भवति अर्थात्संकलितधनस्य, यथात्र स्नः। एकादिदशान्तानां दशगुणितानां शतस्य संकलि
ताम् एकाद्येकचयेन व्यापकलिते किं पृथक्छेषम्। एकादिदशान्तानां दशगुणितानां दशविंशत्यादीनां शतान्ता
नां संकलिते शतसम्बन्धिनः संकलिताद्व्यापकलिते पतिते पृथक् पृथक् शेषं किं भवेदिति। व्याप १० सैकं ११ संनिधाय
११ संगुणयेत्पदयोर्विवरेण तत्या ९ ९ ९० दलितं ४ ५ ९ ५ व्याप २० सैकं २१ संनिधाय १३१ पदयोरन्तरेण

क· घ्रीत्यागुणितं ९८८· दलितं ४८४· व्याप ३· सैकं ३। संनिधाय ४। पदयोर्विवरेण सप्तम्यागुणितं ९१०· दलितं
श्री· ४५८५ व्याप ४· सैकं ४। संनिधाय ५। पदयोर्विवरेण षष्ट्यागुणितं ८४६· दलितं ४२३· व्यापक ५· सैकं ५। सं
॥ निधाय ६। पदमध्येन पंचाशतागुणितं ७५५· दलितं ३७७५ व्यापकलितं ६· सैकं ६। संनिधाय ७। पदमध्येन च
त्वारिंशतागुणितं ८४४· दलितं ३२२· व्या ७· सैकं ७। सन्निधाय ८। पदयोर्विवरेण त्रिंशतागुणितं ५१३· दलितं
२५८५ व्या· ८· सैकं ८। सन्निधाय ९। पदमध्येन विंशत्यागुणितं ३८२· दलितं १८१· व्यापकलितं ९· सैकं ९।
सन्निधाय १०। पदस्य मध्येन दशभिर्गुणितं १९१· दलितं ९५५ व्यापकलितप १०· सैकं १०। सन्निधाय ११। पदस्य
मध्येन गुणितं · दलितं · ॥ संकलितपदोन्त्यधनान्यन्त्का व्यापकलितशेषमवशिष्टान् द्वाभ्यां गुणितान्मूलं शेषसमं नि
र्दिशेद्गुरुः॥ संकलितान्संकलितान्तेऽपतिते शेषं हृष्टेन संकलितपदं च ज्ञायते नतु व्यापकलितं व्यापकलितपदं वा तदा शे
षाद्व्यापकलितपदमानेनुमयंपयन्तः तस्मिन्नानीयमाने व्यापकलितसंख्यानयनात् संकलितपदस्य चापकरणेन प्रकीर्त

नात्रयुक्तियोगिन्येव व्यपकलितपदे अवशेषविनापि गच्छप्राप्तावर्तते शेषधने ज्ञाते तत्पदमपि ज्ञातुमिष्यते किंतु तस्य शक्य प
काद्येकोत्तरसंकलितप्रस्ताराङ्केषु धनं पदानयने एकोत्तरत्वान्नास्ति नन्वेकाधिकेति स्वच्छमारमनयः शिष्याः संकलितप
दानयने शिक्षिताः अन्यदीयसंकलितशेषादन्यदीयपदमानेतुं मार्गं न जानन्तीति शिष्यहिताय माचार्येर्व्याचष्टे सं
कलितपदाद्युत्पत्तिस्तत्त्वं यद्धनं संकलितं तत्तत्तदङ्कं ज्ञातुं पातयित्वा शेषं व्यपकलितसम्बन्धिसंकलितधनं जायते तच्च
द्विष्याविदुः द्विगुणीकृतसंकलितान्मूलमित्यनेन तदष्टसंगुणितमित्यनेन वा पदमानयेयुः यदा तु नैवं तदाह अवशि
ष्टाद्द्वाभ्यां गुणितान्मूलं वर्गमूलं तत्पूर्ववदवशेषसमं वर्गस्तुद्धराशिशेषसमं गच्छं व्यपकलितपदं निर्दिशेत् प्राश्निकस्य
ब्रूयात् । उदाहरणं पूर्वसंकलितादज्ञातराशेः कस्यचित्संकलितस्तु शुद्धे शेषं दृश्यते ४९९ एतत्कस्य सम्बन्धिसंकलि
तमुद्दिष्टमितिप्रश्नकर्म संकलितपदं १०· तद्धनं ५५· अतः शेषं ४९ ९५ पूर्वाधोयित्वा अवशिष्टं ५५ द्विगुणं ११० अतो मूलं १०
शेषं १०· सं ५५· शेषं ४८४· न्यस्त्वावशिष्टात् २१· द्विगुण ४२· मूलं २· शेषं २· तथा व्यपशेष ४५८५ सन्त्यक्त्वावशिष्टात्

क॰ ४८५ द्विगुणात् ९३॰ मूलं ३॰ शेषं ३॰ तयाव्यशे ४२३॰ त्यक्तावशेषात् ८२॰ द्विगुणात् १६४॰ मूलं ४॰ शेषं ४॰
श्री॰ द्विगुणात् ३८८॰ मूलं ८॰ शे ८॰ तयाव्यशे ३७७५ त्यक्तावशेषात् १२७५ द्विगुणात् २५५॰ मूलं ५॰ शेषं ५॰ तया
१२ व्यशे ३२२॰ त्यक्तावशेषात् १८३॰ द्विगुणात् ३६६॰ मूलं ६॰ शे ६॰ तयाव्यशे २५६५ त्यक्तावशेषात् २४८५ द्विगु
णात् ४५७॰ मूलं ७॰ शे ७॰ तयाव्यशे १८१॰ त्यक्तावशेषात् ३२४॰ द्विगुणात् ६४८॰ मूलं ८॰ शेषं ८॰ तया ५५
12 त्यक्तावशिष्टात् ४॰९५ द्विगुणात् ८१९॰ मूलं ९॰ शेषं ९ तया ५॰५॰ व्यशे॰ त्यक्तावशिष्टात् ५॰५॰ द्विगुणात् १॰९॰
मूलं १॰ शे १॰ ॥ विन्यस्याधोगुण्यं कवाटसंधिक्रमेण गुणयेत्॥ गुणयेद्विलोमगत्यानुलोममार्गेण वाक्रमशः।
उत्सार्योत्सार्य ततः कवाटसन्धिर्भवेदिदं करणम्। तस्मिंस्तिष्ठति यस्माद्गुण्यगुणस्तः ततस्तस्थः रूपस्थानविभागाद्द्विधा
भवेन्नवखण्डसंज्ञकं करणम्। अनुत्पन्नविधानेकरणान्येतानि चत्वारि। प्रतिरूपमनुत्पन्नोराशिः कदिष्टरूपप्रन्दस्यक्रियान्स्यादि
तिगुणनगुण

प्राग्वत् पूर्वं वदेवं तदधोन्यासः अष्टस्त्वस्याधःस्थितद्विकयोगेन तत्स्थानशून्यं रूपमपि द्विकाधःस्थितं रूपेण युज्यते द्वे भव

तः ततस्तत्स्थानस्थद्विकं गुणयित्वा सर्पति गुण्यराशिः स्थापनम् | २१ / १२०१९ / २ | इदानीं द्वादशानामेकविंशतेश्च गुणप्रगु

णकभावो जातः एकगुणितो द्वौ द्वावेव एकाधःस्थद्विकं त्यक्त्वा जातौ द्वौ द्वाभ्यां च द्वौ गुणितौ चत्वारः स्था

धःस्थितद्विकयोगात्षट् ततः सहस्रस्थानस्थं रूपं गुणयित्वा सर्पति गुण्यराशिः न्यासः | २१ / १९२१९ | इदानीमेकस्ये

कविंशतेश्च गुण्यगुणकभावो जातः तदा रूपेण गुणितं रूपं रूपमेव षट्स्त्रित्वं समभवत् भ्यामेकं द्विगुणि

तं द्वाविति तिः शेषिते गुण्यराशौ गुणके निहते तत्फलं तदेव २७२१९ एवं रूपविभागे यथास्माणि विभागे स्थानानि

तानि श्च यकृत्य गुणकेन गुणयित्वा फलानां युतिः कार्या यथा पंचद्विकसप्तकानि एकविंशतिगुणानि १५२२५

रूपसप्तपंचकानि एकविंशतिगुणानि ११५५१ युतौ २७२१९। एवं स्थानस्थानविभागे यथा सहस्रमेकविंश

तिगुणं २१००० शतद्वयमेकविंशतिगुणं ४२०० नवतिरेकविंशतिगुणिता १८९० षडेकविंशतिगुणिताः १२६।

ब॰ सर्वेयुताः २७२१८ एवं षण्णवाष्टानां समनिगुणानां तथा पंचकषड्द्वाष्टकानां षष्टिगुणानां स्थापनकर्मफलानि द्र
श्री॰ ष्टव्यानि विलोमगत्या कवाटसन्धिः स्फुकर इति सप्तवर्षसर्वमुद्दिष्टः ॥ क्षेपसमं खं योगे राशिरविकृतः खेयोग
१३ नापगमे खस्य गुणनादिके खं संगुणने खेन च खमेव ॥ एवं शून्यं क्षेपेण क्षिप्यमाणेन समं भवति न त्वधिकं फलं जायते
13 कदा योगेऽतो यथा दश शून्यं पंच क्षिप्यमाणाः शून्यस्थाने पंचैव भवन्ति न तु काचिदधिकलातिरिच्यते प्राप्तस्त्वयौगिको
तिरेकः तथा यस्मिन् राशौ खं क्षिप्यते यतो वा राशेः खं शोध्यते स राशिर्न विकारमाप्नोति प्राप्तस्त्वयौगिकातिरेकः वैयो
गिकोपचयः यथा पंच दश शून्ये दशके क्षिप्यमाणे वियुज्यमाने वा पंचानामुपरि शून्यं क्षिप्तं समनतिरेककारि संशोध्यमा
ने वा नापचयकारि दशस्थानस्थपाश्चत्यरूपयोर्योगे पंचविंशतिः वियोगे पंच तथा शून्यस्य गुणने भागे वा खमेव यथा
खरूपयोः पंचभिर्गुणने रूपं पंच जायते शून्यं शून्यमेव तथा शून्येन योः राशिः संगुण्यते वा विभज्यते स शून्यरूप एव य
था शून्येन गुण्यमानाद् दश शून्यमेव शून्येन भागे शून्यमेव योगे न विक्षेपासंभवात् क्षेपसममित्यनेनैव योगात्क्षेपाद्या

गग्रहणं किमिति चेत् उच्यते क्षेपो द्विविधः ऋणात्मको धनात्मकश्च तत्र धनात्मकोपि क्षेपसमत्वविधानार्थं योगग्रह
णम् ऋणक्षेपे हि क्षेपसमत्वं न भवत्येव यथा विंशतेः षट्सु पात्यमानेषु द्वादश भवंति इति ऋणक्षेपसमत्वं न जायते।
तुल्येन संभवे सति हरं विभाज्यं च राशिनाच्छित्वा भागो हार्यः क्रमशः प्रतिलोमं भागहारविधिः॥ येनैव राशिना हरश्छि
द्यते निःशेषं भागं दत्त्वाति तेनैव राशिना यदि विभाज्योपि छिद्यते तदा तेन तेन यथाक्रमं त्वापवर्तितेन हरेणापवर्तिताद्भाज्याद्भा
गो हार्यः इत्थमपि संभवे सतीत्यत्र वर्तते यदि हि हरादधिको भाज्यो न भवति तदा भागलाभो नास्तीत्येव तत्फलत्वात् भा
ज्यात् न्यूने हारे सर्वाणि भाज्यस्थानानि भंक्तुं न शक्यन्ते इत्याह क्रमशः भागप्रदानस्थानात्प्रभृति यथासंख्यं भाज्यभाजकयोः
स्थानसंबन्धः ततः संभवाद्भागापहारः भागलब्धकः पृथगेकान्तेन स्थभाजकं समर्पयेत् यथासंभवं भागहारादुत्पन्नो
भागलब्धकः प्राक्तनभागलब्धवर्गपंक्तौ स्थाप्यः एवं भागहारविधिः प्रतिलोमम् परमान्त्यात्स्थानादारभ्य न तु प्रथमाद
ष्टाशतादिसर्पेण क्रमेण यथा क्रियमाणे फलविनाशात् एवं तत्र स्थानविभागो नास्ति नाधिकवाटसंधिः उदाहरणं।

क॰ प्रत्युत्पन्नफलानांसस्वगुणाङ्केदानांन्यासः २२२१८ तथा ३३१५२ तथा ४८३९०० तत्रप्रथमोदाहरणेप्रक्रियः
श्री॰ हरः २१ विभाज्यः २२२१८ अनयोःतुल्ये २१ नत्रि ३ केनत्रे ९ दस्यासंभवः तस्मात्त्रिभिरपवर्ति
८ तौ ७।९.७२ ततोभागोहार्यः क्रमशः सवर्णितेलोमयथा ९.७२ तत्रप्रः सप्तकंयड्गुणंशुध्यतितद्गुणंशोध्यं अ
त्रैकगुणंशुध्यति शोधयित्वाजातं २.७२ भागहर्ताहर्तार्यः सन् तस्मात्स्थानादन्यस्थानंभागहरणाययाति लब्ध
मूर्ध्वस्थानादुपरिस्थाप्यं न्यासः २.७२ अत्राविंशतेः सप्तकंद्विगुणंशुध्यतीति लब्धौद्वौ २ सप्तद्विगुणाश्चतुर्दशविंश
तेः शोधयित्वाशेषं ६.७२ लब्धंशेषवद्भागस्थानादुपरिमत्राग्निस्थानेस्थाप्यंन्यासः १ २६.७२ अधुनासप्तभ्योधर्भाग
हर्तातिष्ठतिन्यासः ६.७२ सप्ताधिकायाः षष्टेः सप्तकनवगुणंशुध्यतीतिलब्धंनवकंसप्तस्थानोपरिस्थाप्य ल
ब्धगुणोहारः ६३ सप्तषष्टेःशोध्यजातं १२ ९ ४ २ अधुनाभागहर्ताद्विस्थानाधर्यातियथान्यासः १२९ ४३ द्विसाहि
तचत्वारिंशतः सप्तकंषड्गुणंशुध्यतिलब्धंषट् लब्धंपंक्तौनवकादग्रेभागस्थानादुपरिस्थाप्यंल ३ अगुणाः

14

सप्त भाज्यराशेः शोधयित्वा शेषं ० भाज्यराशिर्निःशेषितः लब्धमेकत्र १२५८ यत्रतुल्येन राशिना छेदसंभवो नास्ति
तत्र यथास्थितेन हारेण यथास्थितं भाज्यं विभजेत् यथा द्वितीयराशौ ३३१५२ अत्र हरभाज्ययोरपवर्तनसंभवो नास्ति
इति सप्तत्रिंशता एकत्रिंशदधिकशतत्रयस्य भागे हृते वर्धयद्गुणः शुध्य १२ नीति न तल्लब्धमिति लब्धमष्टौ भाजकादि
मस्थानादुपरिमराशेश्च उपरिस्थाप्यं लब्धगुणश्च भाजकः २५८ उपरिमराशेः शुद्धः शेषं ३५५२ भागहर्ता न्य
स्थानं गतं उपरिमराशिं शान्विभज्य लब्धं नव ९ करोति न चाष्टकादग्रे भाजकादिमस्थानादुपरिस्थापितं लब्ध
गुणश्च भाजको भाज्याच्छुद्धः शेषं २९२ पुनरपि भाजकेन्यस्थानं यानेपाप्यङ्केन लब्धं षट् लब्धं पञ्चोन नवकादग्रे भा
जकादिस्थानादुपरिन्यस्तं लब्धगुणो भाजकः २२२ भाज्याच्छुद्धः शेषं ० लब्धमेकत्र ८९८ एवं तृतीयराशौ भाज्य
भाजकयोस्तुल्येन राशिना दशकेन च्छेदसंभवो वर्तते इति तेनैव च्छित्वा षट्केन ८ भाजकेन भाज्यं ४८३९ ० भक्तं लब्धं
८०८५ प्रतिलोममिति वचनादनुलोमप्रकारेण भागविधिर्नास्ति ॥ वर्गानयने करणसूत्रमार्याद्वयम् । स्थाप्यान्त्यप

का॰ दस्यहतिं शेषपदेर्द्विगुणमन्त्यमभिहन्यात् उत्सार्योत्सार्यपदाङ्कं चोत्सारयेत्कृतये सदृशद्विराशिघातो रूपादिद्वि
श्री॰ चयपदसमासो वा इष्टोनयुतपदवधो वा तदिष्टवर्गान्वितो वर्गः ॥ आर्याद्वयेनतत् राशिरात्महतो वर्गः सकृत्यमान्
१५ गुणो भवतीति चत्वारः प्रत्यक्षपरोक्षाः उपायाः सम्यग्राशिर्दिष्टः प्रत्युत्पन्नोक्तप्रकारस्वपंचेनयदात्मानं गुणयेत्स
तावत्कवाटसन्धिप्रत्यक्षः रूपस्थानविभागयोः प्रत्यक्षपरोक्षः गुणकराशेः प्रत्यक्षत्वाद्गुण्यराशेर्विभागपरोक्ष
त्वात् द्वित्वान्त्यपदस्य कृतिमित्यादिकर्माणि एक प्रत्यक्षता द्वितीयस्यैकेनापि रूपेणानाश्रयणात्परोक्षता परोक्षत्वम
पि द्विविधम् रूपस्थानविभागे गुण्यस्य परोक्षत्वे सति तदारम्भकाणामाश्रयाणां द्वित्वान्त्यपदमित्यत्र तु द्वितीयस्य सकृति
राशेरनेकधा विदाश्रयरूपाश्रितानाश्रितभेदाद्द्विविधं परोक्षत्वम् रूपादिद्विचयपदसमासो वेति परोक्षत्वमेव एकत्रापि
राशिप्रत्यक्षत्वाभावात् अनाश्रितं चात्र परोक्षत्वम् वैकल्पिकं च यातात्मको हि वर्गो न च रूपादिद्विचयादिकर्माणि ज्ञा
तरूपता काचिदस्ति संकलितेन वर्गसिद्धेः रूपस्थानविभागे तु ज्ञानयोगाभ्यामित्येवमपि परोक्षत्वे द्वैविध्यम् केवलेन

निजकर्माविभक्तकवाटसन्धावस्ति यद्यपिवक्ष्यादिद्विवयेत्यत्र कथमपिमूलराशेराश्रयणान्मजेह्रस्वंतयापिवय
स्यावधिमानंविवक्षितंमूलसंमितमिति उपाश्रितात्वेः परोक्तभेदः इष्टेनयुतपदवधेवेत्यत्रापिराशिद्वयापिएउसंख्या
श्रितोप्यपाश्रितात्वेभेदइतिमन्यन्ते तत्रसस्तोत्तक्रमेणप्रकारामाप्ख्यायंते ह्रस्वान्त्यपदस्यह्रतिशेषपदेर्द्विगुणमन्त्य
माभिहन्यात् उत्सार्योत्सार्यपदान् मूलराशेरेकदशादिक्रमेणयदन्त्यंपदंस्थानंतस्यह्रतिवर्गंकुर्यात् तेनैवंह्रत्वाय
द्भवतितस्यापयेत् ततस्तेनान्त्येनद्विगुणेनशेषपदान्यनष्टानिगुणयित्वायद्भवतितच्छेषांयथास्थानंयथाक्रमंस्थापये
त् एषान्त्यपदस्यह्रतिः तत्रान्त्यंपदंनिवर्तते शेषंवोत्सारयेत्ह्रतयेइत्यत्रशेषवचनात् अन्त्यपदेकर्मान्तरानभिधाना
त्ह्रतयेइत्यत्रवर्गह्रतिशिष्टेनद्वयोरपिकर्मणःशेषवशिष्टेनसमर्पणात् वर्गावर्गात्मनांचक्रमेणनिष्ठेतेन्त्यपदेन्त्यदः
न्त्यपदंजायतेतस्यापितथैवकर्म किंतूत्सार्यपदान्पदंशिष्टंसमर्पयेदित्यर्थः उत्सार्योत्सार्यपदादितिशेषपदैर्द्विगुण गु.
मन्त्यमभिहन्यादितिद्विगुणस्यान्त्यस्यशेषपदैरभिजिघांसितस्यइतिकर्तव्यता अन्ययास्वस्मिन्नेवधाम्निस्थितस्यशे

वा॰ षपदाभिधानः स्यात् एवंतावदेकोवर्गानयनप्रकारः द्विस्थानत्रिस्थानाद्यनेकराशेर्वर्गानयनोपयोगी नत्वेकस्थान
श्री॰ स्य अथद्वितीयः प्रकारः सदृशद्विराशिघातइति गुणकारोक्तप्रक्रियया राशिः स्वगुणोवर्गः स्यात् । अथतृतीयः
१८ रूपादिद्विचयपदसमासोवेति यावत्संख्यस्यराशेर्वर्गः कर्तुमिष्यते तावत्संख्यान्येकादीनियथोत्तरंद्विचयानि यथैकं
त्रीणिपंचेत्यादीनिस्थाप्यानि तेषामैक्यंवर्गः अथचतुर्थः इष्टोनेति पदमिष्टेनोनमन्वितंचकार्यं तयोरन्योन्यघातइ
16 ष्टस्यवर्गेणयुतोवर्गः स्यादिति । उदा । एकादिनवान्तानांपंचदशानां षट्सप्ततेस्त्रिषष्टेश्च द्विचतुर्णांचकृतिंवद द्विसहस्राष्ट त्रि
समानाम् । एषांकृतिंवदयथा १ २ ३ ४ ५ ६ ७ ८ ९ एषां तथा २५ अस्यतथा ३६ तथा ६३ तथा ४३२ तथा ७८०२
तत्रएकादिनवान्तानांकृतिंज्ञातुमादेस्यकृतिमिति कृतिरेवकृतिः शेषपदाभावादन्यत्रास्तितेनलब्धायथाक्रमंवर्गाः ।
१ । ४ । ९ । १६ । २५ । ३६ । ४९ । ६४ । ८१ पंचविंशतेर्वर्गः क्रियते अंत्यपदे २ अस्यकृतिः ४ तदेवान्त्यद्विगुणं ४
शेषपदेनपंचकेनहन्यात् २० एतस्यशेषपदस्थानात्प्रत्येकोपरिन्यासः तेनपंचकोपरि शून्यस्यस्थानम् द्विकोपरिस्थित

स्यचतुष्टयस्य विंशतिसंबन्धिनो द्विकस्य योगः ६ समुदितं ६२ एवं ह्रसते मूलराशिसंबन्धि अस्य पदं द्विकं निवर्तते इदा
नीं पंचकमन्त्यपदं जातं स्वस्थानात् प्रतिलोमं सर्पति शून्याधः स्थानं परित्यज्य तद्बहिरवतिष्ठते ततः तस्यापि हतिः २५
पंचकोपरिस्थानात् प्रभृत्युपरि क्षिप्यते तेन पंचकोपरि[illegible]षष्टिसम्बंधिनाष्टकेन द्विकस्य योगः द्विकमेव समुदितं ६२५
शेषपदानां हतिमात्रकर्मणैव मूलराशिशेषः पंचकं वर्तते लब्धं पंचविंशतेर्वर्गः ६२५ सहस्राद्विराशिस्थानः अस्यापि
त्ववत् अथवा रूपादिद्विचयपदसमासवर्गः तथा रूपस्य रूपमेव वर्गः १ द्वितीयात्प्रभृति चयप्रवृत्तेः पूर्वपदेन सहसं
योगसंभवात् ततो द्वितीयस्थाने द्विचयात् त्रयं स्थाप्यते पूर्वेण सह योगाच्चत्वारः एषद्वयोर्वर्गः ततस्तृतीयस्थाने द्वि
चयात्पंच भवंति पूर्ववर्गेण चतुष्केन सह यदि वा पूर्वपंचाभ्यां रूपत्रिकाभ्यां सह नव एषत्रयाणां वर्गः इत्यादि पंचविं
शतेस्तु वर्गानयने रूपादिद्विचयात्पंचविंशतिस्थाने च स्थापनम् १।३।५।७।९।११।१३।१५।१७।१९।२१
२३।२५।२७।२९।३१।३३।३५।३७।३९।४१।४३।४५।४७।४९ एषां युतिः ६२५ अथवा २५३

का॰
श्री॰
८

ष्टेन ऊना १८ तेनैव युता ३२ अनयोः अभ्यासः ५७६ इष्टस्य सप्तकस्य वर्गः ४९ एतेनान्वितः ६२५ एषः पंचविंशतिवर्गः
इष्टस्यानियमः । वर्गमूलकरणसूत्रमार्याद्वयम् । विषमात्पदतस्त्यक्त्वा वर्गं स्थानच्युतेन मूलेन द्विगुणेन भजेच्छेषं
लब्धं विनिवेशयेत्पंक्तौ तद्वर्गं संशोध्य द्विगुणं कुर्वीत पूर्ववल्लब्धम् उत्सार्य ततो विभजेच्छेषं द्विगुणीकृतं दलयेत् ॥
उद्दिष्टराशेर्वर्गात्मकस्य किं मूलं स्यादिति तदानयनार्थमिदम् वर्गराशेर्विषमात् पदात् अन्त्यात् एकतृतीयपंचम
सप्तमादेरेकशतायुतलक्षादिस्थानेभ्यो यत्तमस्थानादन्त्यात्पदात्संभविनं वर्गं त्यजेत् तस्य वर्गस्य यन्मूलं स्यात् तत्तस्मा
च्छोधितसंभविवर्गादेकशतायुतादिभ्यो यत्तमादन्त्यात् स्थानात् ऊनस्थानाधः स्थापयेत् द्विगुणं च कुर्यात् तेन तत्रैवास्थि
तेन उपरिष्ठाद्भागमपहरेत् लब्धं पंक्तौ विनिवेशयेत् ततस्तद्वर्गमुपरिष्ठाच्छोधयेत् तेव द्विगुणीकुर्यात् तस्मिन्द्विगुणीकृ
ते क्रियमाणे यदि स्थानमधिकं जायते तत्पार्श्वे योजयेत् तयोरुभयोरेकराशिता ज्ञेया तस्य राशेर्लब्धसंज्ञा तमुत्सारये
त् ततो विभजेत् लब्धं पंक्तौ विनिवेशयेदित्यादि पूर्ववत् यावत्सर्पणसंभवः समाप्तौ सर्वं लब्धं दलयेत् इतिवर्गमूल

लाभः यथा १८६६२४ कस्य राशेरयं वर्गः इत्यानुलोम्येन एकस्थानात्प्रभृति विषमं समं विषमं समामिति संज्ञा
करणं न्यासः स वि स वि स वि
१ ८ ६ ६ २ ४ अत्र चत्वारः षडष्टकानि एकशतायुतस्थानानि विषमपदानि तेभ्यः अयुतस्थानस्य मष्टक
मन्त्यं विषमपदं तदादिः राशिरष्टादशतेषु संभवी वर्गः षोडश एतेभ्यः अपास्य शेषं द्वौ तदन्तो राशिरुपरितनो भवति
ह्यते एवं स्थिते सति षोडशानां मूलं चत्वारः द्विगुणा अष्टौ वर्गशुद्धिस्थानात् तनस्थाने षट्काधो नेयः तद्भागापहारः उप
रितन्याः षड्विंशतेर्न्यासः २६६२४ त्रिभिः पतनाच्चतुर्विंशतौ शुद्धायां उपरि द्वौ शेषः अधोभागलब्धकास्त्रयः ते पङ्क्त्या
निवेश्याः षट्कस्याधः स्थाप्याः एवं वर्गेण च तदुपरिष्टात् द्विशतिः शोधयित्वा ते त्रयो द्विगुणिताः षट्कर्तव्याः अधः
षडशीतिर्जायते एषराशिस्स्पर्धति पङ्क्त्यां द्वयोरधो भवति अष्टकं सत्राधः न्यासः १०२४ ८६ अनया षडशीत्या उपरितनशतस्य
ह्रासमन्त्यधिकस्य भागः द्वाभ्यां पतनात् त्रिः शेषभाज्यान् दृतिः लब्धं द्वौ तौ पङ्क्त्यां निवेश्य एवं चतुर्णामधः स्थाप्यौ तद्वर्गः चत्वा
रः उपरिष्टात् शोधयित्वा तौ द्वौ द्विगुणौ चत्वारः कर्तव्याः तेन शून्याष्टकं चतुर्थ्य षडधिकं जायते उपरितनो राशिर्निःशेषः

कृ. शुद्ध इति सर्पणादिकं कर्मनास्ति केवलं लब्धराशिदलनमेव कार्यम् तथा कृते लब्धं ४३२ एतस्य वर्गः १८६६२४।
श्री. यद्येकरणस्त्वमार्याद्वयम्। स्थाप्योन्त्यघनोन्त्यकृतिः स्थानाधिकां त्रिपूर्वगुणिताश्च आद्यकृतिरन्त्यगुणिता त्रिगु
१८ णाच घनस्तथाद्यस्य निर्युक्तराशिरन्त्यघनेनासौ समचिरभिहतिः एकादिचयेवान्त्यत्र्यादिहते पूर्वघनयुतिः सैके। मूल
वर्गवधो घनः तस्य त्रिभिः प्रकारैः करणम् तद्यथा उद्दिष्टराशेः कीदृशो घनः स्यादिति समावच्छन्नुत्पन्नविधिनादोस्वा
18 भ्यहतः पुनरपि स्वाभ्यहतः कार्यः हृत्वान्त्यपदस्य कृतिमित्यादिप्रकारैरानीतवर्गः स्वमूलेन गुणनीयः अथवा तस्या
द्यौर्विलोमतोन्त्यके स्थाने गृहीत्वा अन्त्यस्थानस्थस्य सम्बन्धी घन एकान्ते स्थाप्यः तस्यैव सम्बन्धी वर्गश्च त्रिगुणः आदिना
राशिस्थानाद्यस्थानाङ्केन गुणितः प्राक्स्थापितघनात्पृथक्कृतो एकस्थानाधिकेन स्थाप्यः स च यद्येकस्थाने भव
ति तदा एकमाद्यस्थानं निरालम्बं कृत्वा स्थापयेत् अन्यानि दशादिस्थानानि प्राक्स्थापितघनेन यथाक्रमं दद्यात् य
उक्तं स्थाप्योन्त्यघनोन्त्यकृतिः त्रिपूर्वगुणितान्तिमगुणकः इति तदित्यमुक्तम् स्थानाधिकामित्यादि अत्र च यद्यपि अन्त्य

वृत्तेः स्थानाधिक्येनन्यासप्राधान्यादुक्तः तथापित्रिप्रभृतिगणितत्वंविधायकर्त्तव्यः त्रिप्रभृतिगणितेतिकृतेसामानाधिक
रण्येयथानुपपन्नस्त्रीलिंगनिर्देशात् अन्यथा ५ दीन्यस्तायांवृत्तौवचनेनसहृययाप्रतिपादितांकंमिश्रेणचनवर्गभूपना
शान्तसमान्यतानपुंसकलिंगेननिर्दिष्टंस्यात् रागरूपेत्यावाउंलिंगेनांकमिश्रवाप्रतीत्यायितव्यं एवमन्यत्रवचने,
न्यवृत्तौचययोक्तवत्प्रस्तायामादिवृत्तिरन्यगणितात्रिगुणाचस्थानाधिक्येनस्थाप्या तेनापिप्रादित्वनः एवंहिस्था
नान्तेनाराशेर्वचनः अथयदिबहुस्थानोराशिस्तदान्त्ययोर्द्वयोः स्थानयोस्तावदित्थंवचनः कार्यः ततः सहान्त्यारा
शिरन्यत्वेनपरिकल्पयितव्यः तृतीयस्थानमादित्वेन एवंसतिस्थाप्यान्यवचनइतिवस्तुनोन्यवचनस्यकृतत्वात् प्र
न्यवृत्तिः स्थानाधिक्यंत्रिप्रभृतिगणितावेत्यारभ्यकर्मतत्पुनर्वचनकरणम् एतदेवविस्पष्टार्थमभिमतमन्यस्थानाद्व
नावनयोर्नाद्याक्रियाकार्येति आद्याक्रियावचनस्थापनम् तदनयोः पुनर्नकार्यमित्यर्थः एवंप्रतिपिसमाप्तावचतुर्थ
स्थानसंभवेपूर्ववदन्त्याद्यपरिकल्पनाकर्मोपक्रमस्तु अथवाचनमूलराशिसंख्येषुस्थानेषु एकादिवयेनएकाद्यु

१८०

क॰ तैरेणराशिषु स्थापितेषु यस्य घनइष्यते स तत्पूर्वराशिव्यपेत्त्यानावदन्त्यो भवति तस्मिन्नन्त्ये विहते तदादिराशिना
श्री॰ वहते सैके तत्पूर्वराशिघनोपि प्रक्षेप्यः एषोपि घनानयनप्रकारः। उदाहरणम् एकादिनवान्तानां पंचदशानांच
१९ कोघनो भवति षट्पंचद्विकराशेस्त्रिविद्विराशेश्चक यथाङ्कः। एषांकोघनो भवतीति वद यथा १।२।३।४।५।
अस्य तथा ६।७।८।९। एषां तथा १५ अस्य तथा २.३ अस्य च तैरेकादिनवान्तानां स्थाप्यो न्त्यघन इति घनपघनः शेषपदा
२५८ भावादन्यत्क्रमेनास्ति तेन लब्धाय यथाक्रमं घनाः १।८।२७।६४।१२५।+३४३।५१२।७२९ अथ पंचदशानां का २१६+
घन इति शेषपदवत्क्रमेयथा अन्त्यस्य १ घनः १ स्थाप्यः तथाः न्त्यस्य १ कृतिः १ त्रिगुणिता ३ पूर्वेण ५ गुणि
19 तास्थानाधिक्येन गुणितः २५ तथा आद्यस्य ५ कृतिः २५ अन्त्येन १ गुणिता २५ त्रिगुणा च ७५ स्थानाधिक्येन गुणिता ३२५
तथाद्यस्य ५ घनः १२५ स्थानाधिक्यं ३३७५ एष पंचदशानां घनः तथा २५८ अस्य घनकरणं स्थाप्यो न्त्यघनः
८ अन्त्यकृतिः ४ त्रिगुणा १२ पूर्वेण ५ गुणिता ६० स्थानाधिक्येन क्षेपः १८० तथाद्यस्य ५ कृतिः २५ अन्त्येन २

गुणिता ५० त्रिगुणा च १५० स्थानाधिकोनेयोगः १५५० तथाद्य ५घनः १२५ स्थानाधिकं १५६२५ असौ पं
चविंशतिरूपो निर्दिष्टो राशिः स एवाधुनान्त्य इति स्थाप्योन्त्यघन इति जातम् अंत्यस्य हतिरित्यतः पुनः कर्मका
र्यं यथा अंत्यस्य २५ हतिः ६२५ त्रिगुणिता १८७५ पूर्वेण ६ गुणिता ११२५० स्थानाधिकेन युता १८७५०० त
थाद्यस्य ६ हतिः ३६ अंत्यगुणिता ९०० त्रिगुणा च २७०० स्थानाधिकं १६७७७०० तथाद्य ६ घनः २१६ स्था
नाधिकेन युतिः १६७७७२१६ एवमस्य षट्पंचद्विकराशेः २५६ अस्य घनः तथा २०३ अस्यापि पूर्ववत्क्र
मेण कृते जातो घनः ८३६५४२७ तत्र घनवर्गवर्गयोः परामर्शेन शून्यस्थानयोः स्थानानामपि घनेन कृते स्थानां
तरसंभवात् अत्र द्वौ हत घनकरणस्यानिष्टत्वात् यस्य यस्य द्विस्थानस्य त्रिस्थानस्यैवमादेर्वा स्थानान्तरेण सं
भवतो घनकरणं ६२५ अंत्यस्य कोऽपि घनो भवति अंत्यः ६ अस्य घनः २१६ हतिः ३६ त्रिगुणिता १०८ पूर्वेण
पंचकेन ५ अनेन गुणिता ५४० स्थानाधिकोनक्षेपः २७०० आद्यहतिः २५ अंत्य ६ गुणिता १५० त्रिगुणा च ४५०

क. स्थानाधिक्येनक्षेपः २७७५· घनस्तथाद्यस्य १२५ स्थानाधिक्येनक्षेपः २७४८२५ इदानीमन्त्यः ८५ आद्यः २
श्री. स्थाप्योऽन्त्यघन इति स्थापितोऽन्त्यघनः २७४८२५ अंत्यकृतिः ४२२५ त्रिगुणिता १२८·५ पूर्वगुणिता च २५
२. २५· अंत्यघने स्थानाधिक्येनक्षेपः २७७१८·· आद्यकृतिः ४ अंत्यगुणिता २८· त्रिगुणा च ७८· स्थानाधि
क्येनक्षेपः २७७१८७८· आद्यस्यघनः ८ स्थानाधिक्येनक्षेपः २७७१८७८·८ एकादिचयेवान्त्य इत्येतद
20 र्थमुदाहरणं मूलराशिः ५ अस्यकोघन इति अंत्य ५ त्रिहते १५ आदि ४ एतेनापि हते ८· पूर्वघने ८४ युते १२४
सैके १२५ इति। घनमूलानयने करणसूत्रमार्याद्वयम्। घनपदमघनपदे द्वे घनपदतोपास्य घनमतो मूलम्
सेयोऽन्यात्तृतीयपदस्याधस्तद् नष्टवर्गेण एकस्थानेनानयाःशेषं त्रिगुणेन संभजेत् तस्मात् लब्धं निवेश्य पंक्त्यान्त वि.
द्वर्गं त्रिगुणमन्त्यहतम् जह्यादुपरिमराशेः शा एवह्यनमादिमस्यस्वपदान् प्रयस्तृतीयपदस्याधः स्थित्वापि
कविधिर्मूलम्॥ उद्दिष्टराशेः घनमूलं किंस्यादिति मूलानयनार्थोयं विधिः घनपदमघनपदे द्वे इत्याद्यान्यस्य

त्रिस्थानानां संज्ञा आद्यस्य घनपदसंज्ञां ततो द्वयोरघनपदसंज्ञा अग्रतनस्थानसंभवे एवमेव संज्ञां कृत्वान्त्याद्घनपदा
त्संभवे तं घनमपास्य तदीयघनस्य मूलं घनस्य शुद्धिस्थानात्तृतीयस्य पंक्तिस्थानानन्तरस्य अघनपदसंज्ञस्य स्थानस्याधः
स्थापयित्वा तस्य तत्र स्थापितस्य शुद्धघनस्य संबन्धिनो मूलस्यानेन वर्गेण त्रिगुणेन घनशुद्धिमूलस्थापनास्थाना
न्तरालवर्तिस्थानस्थितेन उपरितनराशिं भक्त्वा मूलस्थापनस्थानाग्रे निवेश्य भाजकं कृत्वा तार्यमाद्गिनास्य च तदाम
राशिवर्गं त्रिगुणं स्वान्येन तेन शुद्धघनस्थलेन हतं भागापहारस्थानतदाम स्थानमध्यमस्थानाद् उपरिष्ठात्स्थानतोयत्वा
त्यात्तस्यैवास्य स्वस्थानोपरिष्ठाद्धनं घनात्ये देवघनमूलानयने विधिः प्रथमयद्येवं समासेषि कर्मणि इतरवाशि
ष्यते घनराशिस्तदा घनपदतोपास्य घनमित्यादि वाक्य मेहत्वं मनत्यम यद्यद्विस्थानं प्राक्तनविधिनानीतं मूलं तदे
कवाराशीभूतं तृतीयपदस्याधः संयोज्य सर्वं कर्मावर्तयेत् यावत्त्रिस्थानस्य मूलं जायते तदपि घनशेषसंभवे तस्ये
वद्वार्यादिति यावत्संभवमत्र विधिः निःशेषे घनेन निवर्तते शेषेतु घनमूलविध्यसंभवे घनराशिः समूलदोस्त्येयः॥

क· उदाहरणं प्राक्तनस्य घनराशेर्न्यासः घ अ घ घ अ घ घ अ घ अत्रान्त्यं घनपदं २७४ अतो घनेनायं २१६ शोध्यः
श्री· शेषः ५८। शुद्धघनस्य मूलं ६ पङ्क्तिरेवं ७ २ १ ६ ७ ८· ८ स्थानमनन्त्यस्य सम्भावो वर्तिष्यते ६।१६७८·८
२१ तस्य वर्गः ३६ त्रिगुणः १०८ एवमेकस्थानोनतया उपरितनस्य राशेर्भागापहारः न्यासः ६।१६७८·८ ६ भागे
हृते लब्धं ५ भागहर्त्ताहतनार्थत्वानिरतः समानामधः पंच ७१६ ७८·८ तद्वर्गः २५ १·८ त्रिगुणः अन्त्य
हतः ४५· एकस्थानोनतया षड्भ्योऽधः शोध्यते स्वस्थानाच्च पंचानां ६५ घनः १२५ शेषस्यापनं २५४२८·८ घ
नमूलानयने एषविधिः अथ पुनरपि घनराशिरवशिष्यते तस्माद्भूयः सत्त्वतीयपदस्यान्त्यादिकर्मकर्तव्यं यथा
२५४२८· ८ इदं घनमूलं तृतीयपदस्याधः संयुक्तं अस्य ६५ अनष्टस्य वर्गः ४२२५ त्रिगुणः १२६७५ अनेन
एकस्थानोनतया उपरितनं राशिं विभजेत् न्यासः २५४२८·८ भागे हृते लब्धं २ भागहर्त्ताहतनार्थः सन्निवर्तते
लब्धं पंक्त्यां पंचकस्याग्रे उपरिमराशेरष्टकस्याधः १२६७५ स्थापितं यथा न्यासः ७८·८ तस्य लब्धस्य वर्गः ४
६५२

त्रिगुणः ९८ अंत्येन ८५ गुणितः ७८० उपरिमराशेः लब्धस्यानादेकस्यानेनानेन तया शोध्यते शेषं ८ न्यासः ८५२
लब्धस्य २ घनः ८ लब्धस्यानादुपरि शोध्यते ० घनराशिर्निःशेषितः जातं घनमूलं ८५२ अस्यैव घनः २७१
८७ ८०८ एवमन्येषामपि घनानां घनमूलान्यानेतव्यानि. समाप्तं परिकर्माष्टकम्। अथ भिन्नपरिकर्माष्टकम्।
तत्राभिन्नसंकलितेकरणसूत्रमार्यार्धम्। सदृशच्छेदांशयुतिश्छेदनमच्छेदनस्य रूपं स्यात्॥ सदृशच्छेदा
नां तुल्यहराणामंशानां युतिर्योगः कार्यः यस्य च राशेश्छेदो न स्यात्तस्य रूपमेकः छेदो भवेत् समच्छेदकरणं च भा
गजात्या सविभागजातिस्तुल्येन भागजातौ छित्वा छेदेन संभवेच्छेदौ ताभ्यां छेदांशा हतिस्तुल्यच्छेदार्थमन्योन्य
मित्यनेनान्योन्यच्छेदेन सति संभवे तुल्यराशिश्छित्वा सति संभवे यथास्थितेनैवान्यान्यस्य छेदमंशं च गुणयेत्तौ रा
शी तुल्यच्छेदौ स्यातामिति कथयिष्यते तुल्यच्छेदकरणं च सवर्णनार्थं सवर्णितयोश्च राश्योर्योगो वियोगो वा
स्यात् न तु सदृशैव रूपात्मकराशावंशानां योगो वियोगो वेति उदाहरणम्। अर्धत्र्यंशषडंशत्र्यंशान्द्वादशभागं चक

क॰ यथसंस्थाप्य सदलद्विपादवर्जितरूपत्रयरूपषट्कं च ॥ रूपस्यार्धं रूपस्य त्र्यंशं रूपस्य षडंशं रूपस्य द्वादशभागं च सं
श्री॰ योज्य कथयेति न्यासः १/२ १/३ १/६ १/१२ तथा १/२ १/४ [८] तत्र प्रथमराशौ सवर्णनार्थं अर्धस्य १/२ षडंशस्य च १/६ तु
२२ ल्येन २ राशिना छेदौ २।६ छित्वा जातं ।३ एताभ्यां प्रथमेन द्वितीयस्यांशं १ छेदं च ६ गुणितम् एकेन गु
णितं न दोषेति वचनाज्जातं १/६ द्वितीयेन ३ प्रथमस्यांशं १ छेदं च २ गुणितं ३/६ जातौ समछेदौ राशी ३/६ १/६
22 प्रथमांशस्य षडंशेन सह सवर्णनम् १/६ १/३ छेदयोस्त्रिभिरपवर्तेनान्योन्यस्या पितेजातं १/६ १/३ गुणने
जातं १/६ २/६ एकत्र ३/६ १/६ २/६ सह प्रक्षेपे छेदांशयुतिः ६/६ अथ द्वादशांशस्य षडंशेन सवर्णनं २/६ १/१२ प्र शं
नयोरपि पूर्ववदपवर्तनेनान्योन्यच्छेदनय नेवजातं ६ १ छेदांशयुतिः १२/१२ | १/१२ सह प्रक्षेपे
दांशयुतिः १३/१२ द्वितीयराशिर्यथा १/२ १/४ अनयोः प्रथमराशौ ६/६ १२/१२ भागानुबन्धजातौ रूपगण
छेदसंगुणसांशे इति रूपगणः २ छेद २ गुणा ४ सांशाः ५ जातं ५/४ वक्ष्यमाणेन द्वितीयराशौ भागापवाहजातौ शे

ध्यांशच्छेदगुणितरूपेभ्यः इति वक्ष्यमाणेन रूप ३ छेद ४ गुणः १२ व्यंशः ११ जातं सवर्णिते ११/४ अनयोः समच्छेद
करणार्थं न्यासः ५/२ ११/४ द्वाभ्यामपवर्तितेन्योन्यच्छेदनयनेन गुणितेन च जातं १०/४ ११/४ सदृशच्छेदांशयुतिः २१/४ अस्य रूप
षट्केन सह समच्छेदकरणं छेदेनमच्छेदनस्य रूपं स्यादिति षट्कस्य रूपेच्छेदः कल्पिते २१/४ ६/१ अन्योन्यच्छेदगुणिते जातं
२१/४ २४/४ युतौ ४५/४ प्रथमोदाहरणे १३/१२ स्वच्छेदेन भक्ते लब्धं रूप १ रूपभा १/१२ द्वितीयोदाहरणे ४५ छेदभक्ते लब्धं
रूप ११ भाग १/४ एकाद्येकचयेन भिन्नसंकलितोदाहरणं एकाद्येकचयेनोध्यर्धस्य सखे वदाशु संकलितम्
अर्धस्य त्र्यंशस्य चयादिगणितविधिं विजानासि। अर्धाभ्यधिकस्य रूपस्य तथार्धस्य तथा त्र्यंशस्य चैकाद्येकचयेन संक
लितं वद यदि गणितविधौ विज्ञोसि। न्यासः १/२ १/३ १/२ प्रथमराशौ भागानुबन्धेन सवर्णने जातं ३/२ द्वितीयस्य संकलि
तमिति सैकपदेत्यादिकर्म अर्धार्धं ३/२ सैकं ... समच्छेदीकरणाज्जातं ३/२ युतिः ५/२ इयं ५/१ देन ३/२ गुणिता
पदं १ प्रत्युत्पन्नफलं स्यादंशवधे च्छेदघातसंभक्ते इति वक्ष्यमाणसूत्रेण अंशयोः पंचत्रिकयोर्वधः १५ छेदयोः २।२ वधः ४

का॰ जातं १/४ अस्य दलमपास्तनच्छेदं द्विगुणीकृत्य जातं १/८ इदमध्यार्धस्य संकलितम् एवमर्धस्य सं ३/८ त्र्यंशस्य सं ३/९
श्री॰ एवं च पुनरपि मूलानयनं १/८ विमस्य मूलमिति द्विगुणीकृतच्छेदस्यार्धीकरणं १/४ अतो मूलमवशिष्टसमं ३/
२३ अस्य वर्गः ९/४ पूर्वस्मात्पात्यजातं ६/८ द्वाभ्यामपवर्त्यजातं ३/४ अवशिष्टसमं यद्वा १/८ अष्टगुणं जातं १ पञ्चयुतं ९ त-
न्मूलं ३ निरेकं २ अर्धीकृतं १ इदं परम् एवमर्धत्र्यंशयोः कार्यम्। भिन्नव्यवकलिते करणसूत्रमार्यापरार्धम्
२३ तुल्यच्छेदावध्ययराश्योरंशान्तरं कार्यम्। तुल्यच्छेदादायराशेस्तुल्यच्छेदस्य व्ययराशेरंशं पातयेदव्यवकलितम्।
उदाहरणं पादत्र्यंशषडंशान् रूपात्संशोध्य कथय यच्छेषम्। रूपत्रयमर्धोनं द्व्यंशयुतं वा पञ्चभ्यः॥ रूपात्पादत्र्यं-
शषडंशाँश्च संशोध्य शेषं कथय अर्धेनोनं रूपत्रयं तथा त्र्यंशेन सहितं द्वयं पञ्चभ्यः संशोध्य शेषं कथयेति न्यासः
१/४ १/३ १/६ अत्र पादत्र्यंशौ समच्छेदीकृतौ जातौ ३/१२ ४/१२ युतिः ७/१२ अस्य षडंशस्य च समच्छेदकरणे जातं ७/१२|२/१२ यु-
तौ ९/१२ अस्य रूपात्पातनार्थं छेदेन समच्छेदनस्य रूप १/१ स्यादिति रूपस्य रूपे छेदहतेन्यान्यच्छेदगुणेन जातं ९/१२|१२/१२

अंशान्तरेजातं ३ त्रिभिरपवर्त्यजातंधनशेषं ८ तयार्धोनद्व्यपत्र्यस्यभागापवाहककर्माणिजातं ५ अंशपूर्णयोर्द्व
योर्भागानुबन्धकर्माणिजातं ३/२ एतौसमच्छेदीकृतौ ५/६ | १४/८ युतिः २९/८ अस्याः पंचभ्यः पातनार्थंच्छेदनमच्छे
दनस्वरूपंस्यादितिपंचानांद्वपेणच्छेदहतेसमच्छेदार्थंन्यासः २९/८ | ५/८ नौतौसमच्छेदौ २९/८ | ४०/८ तुल्यच्छेदाय
व्ययराश्योरंशान्तरंऊर्ध्वाधितिजातं ११/८ एकाद्येकचयेनभिन्नसं कलितोदाहरणम् । पंचानामर्धयुजामेकाद्ये
कोत्तरेणसंकलितानां सार्धद्विव्यपकलितेशेषपदंकिंभवेत्कथय॥ अर्धयुतानांपंचानामेकाद्येकचयसंकलि
तानांसार्धयोर्द्वयोः संकलितेव्यपगतेशेषपदंकिंस्यादितिकथयेति अत्रपंचानामर्धयुजांसार्धद्वयोश्चभागानुब
न्धकर्माणिजातं ११/२ | ५/२ प्रथमराशेः सैकव्यपकलितपदमित्यनेनसंकलितं १४३/८ सार्धद्वयोः संकलितं ३५/८
अन्योन्यमन्तरेजातेऽस्मिं १०८/८ स्वच्छेदेनभक्तं ठ १३ भा १/२ यद्वाव्यपकलितपदं ५/२ सैकंसमच्छेदीकृत्य ५/२ | २/२
युतं ७/२ संकलितपदेन ११/२ समच्छेदत्वान्नशनस्समच्छेदीकरणं तस्माद्युतंस्वच्छेदेनभक्तंजातं ९ पदयोः ७/२ ११/२

क॰ अंतरं स्वच्छेदेन भक्तं ३/२ अनेन सर्वं ९ गुणितं २७ दलीकृतं २७/२ स्वच्छेदेन भक्तं लब्धं १३ अं १/२ पूर्ववत् समम् अत्र वर्ग

श्री॰ कलितपदोन्मथनादित्यादिना तद्देवपदं सार्धद्वयम् ५/२ ॥ भिन्नघनतुल्यकरणसूत्रमार्यापूर्वार्धम् ॥ घनतुल्य

२४ त्रफलं स्यादंशवधे छेदघातसंभक्ते ॥ अंशानां वधे गुणिते छेदानां घातेन वधेन भक्ते सति घनतुल्यत्रस्य गुणनस्य फ

लं स्यात् उदाहरणम् । अर्धार्धेनाभ्यस्तं सार्धद्वितयं विभागयुक्ता च षष्टिः पंचार्धगुणा किं भवति धनं पृथक् कथय । अ

25 र्धेन सहितं द्वयम् अर्धाभ्यधिकद्वयेन गुणितं किं धनं स्यादिति कथय तथा त्र्यंशेन युता षष्टिः सार्धाभ्यां द्वाभ्यां गुणिता

किं धनं स्यादिति च पृथक् कथयेति भागानुबंधकर्मकृतानां राशीनां न्यासः ५/२ | ५/२ तथा १८१/३ | ५/२ प्रथमराशावंश

वधः १५ छेदवधः ४ जातं २५/४ स्वच्छेदेन भक्तं जातं ६ अं १/४ तथा द्वितीयराशावंशवधः ९०५ छेदघातः ६

जातं ९०५/६ स्वच्छेदेन भक्तं लब्धं १५० अं ५/६ भिन्नभागहारकरणसूत्रमार्यापरार्धम् । छेदांशविपर्यासे हरस्य विहि

तो विधिः पूर्वः । हरस्य भाजकस्य छेदानामंशानां च विपर्यासं कुर्यात् छेदस्थाने अंशस्थापनम् अंशस्थाने छेदस्थाप

नामित्यर्थः एवं कृते सर्वो विधिः प्रत्युत्पन्नवद्विधिः कार्य इति विध्यतिदेशोऽयम् । उदाहरणं । सार्धद्वयेन भक्ताः
षट्पादयुतास्त्रिभिः सार्धैः पादयुतरूपषष्टिः संभक्ता कथय पृथग्गणितम् । पादेन युताः षट् सार्धाभ्यां द्वाभ्यां भ
क्ताः किं लब्धं कथय तथा पादेन युता रूपाणां षष्टिः सार्धैस्त्रिभिर्भक्ता चेत् किं मानं स्यादिति वद कथयेति भागात्र
वंधकर्मणि कृते प्रथमराशिः २५/४ । ५/२ । द्वितीयराशिः २४१/४ । ७/२ प्रथमराशेर्हरस्य ५/२ छेदांशविपर्यासे जाते
२/५ अनेन भाज्यः २५/४ गुणितः ५०/२० लब्धं २ अं १/२ तथा द्वितीयराशेर्हरस्य ७/२ छेदांशविपर्यासे जाते २/७ एवं वि
धिरिति प्रत्युत्पन्नफलं स्यात् अंशवधे छेदघातसंभक्ते इति भाज्ये २४१/४ गुणिते ४८२/२८ स्वछेदभक्ते लब्धं १७ अं
३/१४ । भिन्नवर्गकरणलक्षणमार्यापूर्वार्धेन ॥ अंशाहतौ भक्तायां छेदनवर्गेण भिन्नवर्गफलम् । अंशानां हतिं छेदा
नां हत्या विभजेत् भिन्नवर्गफलं स्यात् । उदाहरणम् । सार्धद्वयस्य वर्गं पंचदशानां च पादयुक्तानाम् अर्धस्याथ
भ्रांशावकथयसखे यदि भिज्ञानासि । हे मित्र यदि त्वं जानासि तदा सार्धस्य द्विकस्य वर्गं तथा पादयुक्तानां पंचद

२५

का॰ ष्टानां च वर्गेण यार्धस्य वर्गेण यांऽशस्य वर्गं कथयेति भागानुबन्धकर्मणा प्रथमो राशिः सवर्णितः २५/४ अस्य व

श्री॰ र्गः २५।४ लब्धं ६ भागः १ छे ४ तथैव द्वितीयराशिः सवर्णितः ८१ छेदः ४ अस्य वर्गः ६५६१ फलं रू

२५ ४१० भागाः १ छे १६ अर्धस्य वर्गो वर्गफलं च १/४ त्रिभागस्य वर्गो वर्गफलं च १/९ भिन्नवर्गस्य करणसू

त्रमार्यापरार्धम्। अंशस्य वर्गमूले छेदनमूलोद्धृते मूलम्॥ वर्गात्मकस्यांशस्य यन्मूलं तस्मिन्वर्गात्मकस्य।

25 छेदनस्य मूलेन भक्ते भिन्नवर्गमूलफलं भवति उदाहरणं प्राक्साध्यवर्गाणां न्यासः रू ६ अं १ छे ४ रू ४१० अं

१ छे १६ अं १ छे ४ अं १ छे ९ एषां यथासंभवं भागानुबन्धेन सवर्णितानां न्यासः रू २५ छे ४ मूलं ५ छे २ अस्मा

त्फलं रू २ अं १ छे २ अं ६५६१ छे १६ मूलं ८१ छे ४ अस्मात्फलं रू २० अं १ छे ४ अं १ छे ४ मूलफलमपि अं

१ छे २ अं १ छे ९ मूलफलमपि अं १ छे ३ ॥ भिन्नघने करणसूत्रमार्यापूर्वार्धम्॥ अंशस्य घनं विभजेच्छेदस्य

घनेन घनपदं भवति॥ उदाहरणम्। समानां सार्धानां समदशानां च पादयुक्तानाम्। अर्धस्यांशस्य कथय घ

नेयदि विज्ञानासि ॥ सप्तानां सार्धानां रूपार्धसहितानां २० घ्नं १ कं २ समदशानां च पादयुक्तानां रूपचतुर्भागसहि
तानां १७/४ पादस्य रूपचतुर्भागस्य १/४ त्र्यंशस्य च नव्या रूपत्रिभागस्य १/३ एषां भिन्नराशीनां घनं भिन्नघनफलं कथय
जाना ४ सि चेत् नव सार्धानां सप्तानां भागानुबन्धविधिना सवर्णनेन न्यासः १५/२ अस्य घनः ३३७५/८ फलं ४२१ ७/८ समदशा
नां सपादानां भागानुबन्धकर्मणा सवर्णितानां न्यासः ६९/४ अस्य घनः ३२८५०९/६४ फलं ५१३२ ६१/६४ चतुर्भागस्य घनः फ
लं च १/६४ त्रिभागस्य घनः फलं च १/२७ भिन्नघनः समाप्तः ॥ भिन्नघनमूले ६४ करणसूत्रम् ६१/६४ र्यापरार्थम् घनस्य घनमू
लराशौ घनमूलं छेदमूलहृते ॥ भिन्नस्य राशेर्घनात्मकस्यांशसंबन्धिनि घनमूले राशौ छेदसम्बन्धिना घनमू
लेन भक्ते भिन्नघनमूलफलं भवति प्राग्लब्धघनफलानां न्यासः ४२१ ७/८ | ५१३२ ६१/६४ | १/६४ | १/२७ अत्र प्रथमो भागानुबंधे
न सवर्णितो घनराशिः ३३७५/८ मूलं १५ फलं २ द्वितीयस्यांशीकृत घनस्य न्यासः ३२८५०९/६४ घनमूलं ६९
फलं १७/४ तृतीयस्य न्यासः १/६४ घनमूलं फलं च १/४ चतुर्थस्य न्यासः १/२७ घनमूलं फलं च १/३ ॥ ६४ भिन्नघनमूलं स

क॰ श्री॰ २८

मानम् ॥ अतः परं कलासवर्णो भविष्यति । तत्र भागजातौ करणसूत्रमार्यामाह । तुल्येन भागजातौ छित्त्वा छेदेन
संभवे छेदौ ताभ्यां छेदांशौ हतिस्तुल्यछेदार्थमन्योन्यम् ॥ श्रुतिः सदृशछेदानामेवोक्ता तत्र येषां छेदसादृश्यं
नास्ति इति सूत्रकर्तुरुपादीयते तेषामयं प्रकारः छेदसाम्यार्थं उपदिश्यते द्वयोर्भागराश्योः पृथक् यदि जेछे
दच्छिन्नयोर्यैश्छेदौ तौ येन केन राशिना छिद्येते तेन तयोश्छिन्नयोर्यौ राशीभवतस्तयोरन्यदीयेनान्यमंशछेदसहितं
गुणयेत् द्वितीयेनाप्यन्यमंशसच्छेदं एवं समच्छेदता जायते अथ छेदयोरेकराशिच्छेदासंभवस्तदैकीयेन छेदेन
छेदतुल्यांकेनान्यमंशछेदसहितं गुणयेत् द्वितीयसंबन्धिना वा गुणितेन छेदेन तमंशं सच्छेदं गुणयेत् एवमपि स
मच्छेदता जायते आद्यच्छेदसमीकरणे लघुत्वं सर्वसंभवि तु विपरीततरमित्यर्थवदुभयम् । उदाहरणम् । रूपादिष
उन्नच्छेदैरेवैकेनांशकेन को राशिः रूपादि नवान्तैश्च हरैर्द्व्यादिभिरंशैस्समायोगात् ॥ द्विच्छेदेनैकेनांशकेन त
यादिग्रहणात्त्रिच्छेदेनैकेनांशकेनैवं चतुर्भागेन पञ्चभागेन षड्भागेन एतैस्समायोगात्को राशिः अपि च द्वाभ्यां

26

त्रिच्छेदाभ्यां त्रिभिस्तु तच्छेदैः चतुर्भिः पंचच्छेदैः पंचभिः षट्छेदैः षड्भिः सप्तच्छेदैः सप्तभिरष्टच्छेदैरष्टभिर्न
वच्छेदैः संयुतः कोराशिः प्रथमोदाहरणेन्यासः १/२ १/३ १/४ १/५ १/६ अत्र द्विभागचतुर्भागयोश्छेदापवर्तनेन द्वाभ्यां
तावनष्टावपवर्त्य क्रमाल्लब्धं १।२ रूपेण चतुर्भागे गुणिते द्वाभ्यां द्विभागे च जातौ राशी तुल्यच्छेदौ २/४ | १/४ युति ३/४
अस्य षड्भागस्य च सवर्णने द्वाभ्यामनष्टौ छेदावपवर्त्य लब्धं क्रमात् २।३ द्वाभ्यां तच्छेदे षड्भागे गुणिते त्रिभिः तच्छे
दे त्रिभागचतुष्टये च जातौ तुल्यच्छेदौ राशी ९/१२ | २/१२ युतिः ११/१२ अस्य त्रिभागेन सह सवर्णने त्रिभिरनष्टौ छेदावपव
र्त्य क्रमात् ४।१ चतुर्भिस्तच्छेदे त्रिभागे गुणिते रूपेण तच्छेदैश्चैकादशसु द्वादशभागेषु जातौ तुल्यच्छेदौ रा
शी ११/१२ | ४/१२ युतिः १५/१२ अत्र च्छेदांशयोस्त्रिभिरपवर्तनमस्तीति तेन तथाकृते जातं ५/४ अस्य च पंचभागस्य छेदयोरपव
र्तनं नास्ति तस्माच्चतुर्भिः तच्छेदे पंचभागे गुणिते पंचभिश्च तच्छेदे चतुर्भागेषु जातौ तुल्यच्छेदौ राशी २५/२० | ४/२०
युतिः २९/२० अनेन लब्धं रू १ भागाः ९/२० इह च युक्तावयमेव नादौ युज्यते पश्चादनेनैवं विधः क्रमो नास्ति तस्मा

व॰ द्विभागस्य चतुर्भागस्य च यथा युतिः तेनैव प्रकारेण द्विभागस्य त्रिभागस्य चेत्येवमन्येनापि प्रकारजातेन युतिः
श्री॰ कार्या अथ द्वितीयोदाहरणन्यासः $\frac{२}{२}$ $\frac{३}{४}$ | $\frac{४}{५}$ | $\frac{५}{८}$ | $\frac{८}{७}$ | $\frac{७}{८}$ | $\frac{८}{९}$ अनयोस्त्रिभागयोस्त्रयाणां चतुर्भागानां छेदयो
२७ रपवर्तनाभावाद्यथास्थिताभ्यां छेदा भ्यामेव परस्परगुणनेन जातौ तुल्यछेदौ राशी $\frac{८}{१२}$ | $\frac{९}{१२}$

27

युतिः $\frac{१७}{१२}$ अस्य चतुर्णां पंचभागानां च सच्छेदानां छेदाभ्यामन्योन्यगुणनेन जातौ तुल्यछेदौ राशी $\frac{८५}{६०}$ | $\frac{४८}{६०}$ युतिः
$\frac{१३३}{६०}$ अस्य पंचानां षट्छेदानां च षड्भिरनष्टछेदावपवर्त्य लब्धौ क्रमाद्गुणकौ १|१ त्रयस्त्रिंशदधिकं शतं स
षष्टिछेदरूपेण गुणितं पंचकस्य षट्छेदरूपगुणितेन जातौ तुल्यछेदौ राशी $\frac{१३३}{६०}$ | $\frac{५०}{६०}$ युतिः $\frac{१८३}{६०}$।
अस्य छेदांशयोस्त्रिभिरपवर्तनमस्तीति तथा कृते जातं $\frac{६१}{२०}$ अस्य च सप्तभागानां च $\frac{६}{७}$ छेद $\frac{६}{७}$ योरपवर्त ना
भावान् छेदाभ्यामन्योन्यगुणनेन जातौ तुल्यछेदौ राशी $\frac{४२७}{१४०}$ | $\frac{१२०}{१४०}$ युतिः $\frac{५४७}{१४०}$ अस्य सप्तानामष्टछेदानां च च
तुर्भिरनष्टछेदावपवर्त्य लब्धौ क्रमाद्गुणकौ ३५|२| तेन च सप्तचत्वारिंशदधिकानां पंचशतानां सप्तसच्छेदगुणितेन द्वाभ्यां च स

चत्वारिंशदधिकशतपंचकेसच्छेदंशगुणितेजातौतुल्यच्छेदौराशी १५४ । ३४५ युतिः १५२९ अस्यवर्ग
२८ २८
स्थानंनवच्छेदानांच्छेदयोरपवर्तनाभावाच्छेदाभ्यामन्योन्यगुणनेजातौराशी २८ १२५१ २५२ ३६ २५२ युतिः
१८२५१ लब्धंरूपाणि ५ भागाः १८५१ अधरहरोर्ध्वांशावधेवोर्ध्वहरेणाधरंहन्यात् । मध्यांशौहराभ्यासंवि
नि २५२ त्रिपञ्चपरिमांशाः ॥ चशा २५२ हः प्रकारान्तरसंभावनासूचनार्थः एकः प्रकारउक्तः अयंद्वितीयोपि
प्रकारः संभवतितस्मादनेनप्रकारेणयुतिः कार्या अनेनैवेतिकर्मणिविकल्पः पर्यवसितः अधरोर्ध्वमध्यतादिशि
तेन भक्तान्मार्गपरिमाणात्समागमे काल आप्यते दिनादिः उदयमभिप्रायः मंदगतिशीघ्रगत्योर्योजनादि मिलि
ते द्विगुणमार्गप्रमाणसमं भवति तयोश्च प्रतिदिनगसमागमकालगुणित इति तद्योगभक्तो द्विगुणमार्गस्तुल्य
कालप्रदो भवति तथा चैत्र राशिकं एकेदिनेन यदीष्टगतियोगो दश योजनानि प्राप्नोति यांतितत्योजनसातहयकि

यतेतिरश्मिभिः शतद्वये मतो विंशतिर्दिनानि भवेति यत्नमार्गो द्विगुणायित व्येतद्दक्षितेवसूत्रे दिनगतियोगार्धःकृ
नः सतदभिन्नार्थ एव यस्माद्यज्ज्ञगुणको भाजकश्छेदविधिना नविसृवतश्चन्याङ्कः ततश्च एव मार्गप्रदेशगतला
भोपिसिध्यति उदाहरणं॥ एकोनाधोयोजनान्यष्टौ यात्यन्यो योजनद्वयं योजनानां शतं पंथाः संगमः क्व समागमे
एककालमेकस्मात्प्रदेशाद्द्वौ पुरुषौ योजनशतप्रमाणं पंथानं गंतुं प्रस्थितौ तयोरेकः एकेन दिवसेनाष्टौ योजना
नियमाद्गच्छति द्वितीय एकेनैव दिवसेन योजनद्वयं गंतुं शक्नोति तयोः सोष्टयोजनः पुरो गच्छन् गंतव्ययोजन
शतपरिमाणं मार्गमतिवाह्य नस्य द्वियोजनस्य प्रत्यावर्तितव्यात्संमुखमागच्छन् कस्मिन् काले संगमं मेलापं भजतेति
न्यासः ८।२।१०। आदिस्थितेर्दिनगती अत्राष्टकद्विके तयोर्योगः १० अस्यार्धं ५ अनेन हृतान्मार्गात् १० ५ । आ
मे २० एषसमागमे संगमे कालः तद्यथा द्वियोजनस्तावत् विंशद्योजनानि एतेन कालेन प्रयाति अष्टयोजनस्तु ष
ष्टुत्तरं शतं योजनानां शतयोजनप्रमाणं मार्गमतिवाह्य योजनानां षष्टिं प्रत्यावर्तते एवं च लब्धे काले मार्गप्र

क॰ ग्री॰ ८८ देशोप्यानीयते यथाद्वेयोजने यद्येकेन दिनेन नद्योगन शान्तं क्रियते तिन्यासः ३।८।१०॥ मध्यम् १ अन्त्येन १०॥ गुणि
तं १०॥ आदिना २ विभजेत् ५॰ अथ यं वा शनादिनैर्यदि योजनशतं न हि न विंशत्या किमिति न्यासः ५॰।१०॥।२॰
मध्यम् १०॥ अन्त्येन २॰ गुणयेत् २॰॥ आदिना ५॰ विभजेत् ४॰ इति संगमकाले ज्ञाते मार्गप्रमाणमानीयते य
थादिनगतियोगार्धगुणात्संगमकालात्पथः प्रमाणं स्यात् दिनगतियोगार्धं ५ एतेनास्मात्संगमकालात्
२॰ गुणितान्मार्गो योजनानि १०॥ अथ संगमकालविभक्तान्मार्गाद्द्विगुणाद्गतिविशेषोन्या। मार्गात् १०॥ अस्मा
त्कालहृतात् ५ द्विगुणात् १॰ ज्ञातशीघ्रगत्या ८ विहीनात् २ अज्ञातमंदगतिरेषा अथानेयैव २ ज्ञातम
न्दगत्या विहीनात् ८ अज्ञातशीघ्रगतिरेषा॥ करणसूत्रमार्यापरार्धम्। पतितस्य भाटकार्धं दद्यात्क्षेपस्य
परिशुद्धिम्॥ सहसा पुनितस्याति वाहितमार्गांशानुसारेण स्वप्रमाणानुसारेण वा उपातिको नियमितभा
टकभागः पंचराशिकेनैव सेत्स्यति भाटकार्धप्रदानमनेयामिकं तत्र नयुक्तमिति स्वारम्भसामर्थ्यात्क्रमप्र

81

तिनस्य भाटकस्तानार्थमेतत् तदयमर्थः क्रमपतितस्याउगपक्षलिनस्याः वयविनस्तस्य स्तेनहद्रव्यस्यतैला
देशाउपातिकभाटकांशलोपेप्राप्तेऽर्धं दद्यात् अक्रमनिपाते हि तद्भाटकांशपूर्णं लभ्येत् क्रमनिपाते त्वारम्भात्
श्रुतिपरिसमाप्तिपर्यन्तं किंचित्किंचिद्दशाहानि क्रमेण शेषं शेषं वृद्ध्यैव भाटिकेऽन्ततो नास्ति लोपः अर्थे त्वय
मभिप्रायः क्रमवर्धमानस्य क्रमह्रासिनो वा सर्वेधनमात्रं तथानयस्तु तिदलं पदहतं भवति तद्यथा प्रथमदिने
येन रूपषट्कं दत्तं अनन्तरं द्वितीयेऽह्नि पञ्चैकरूपहीनानि यावद्दिनानि पंच तेन प्रथमदिने रूपषट्कं दत्तं यावत्
पंचमे रूपदशकं तद्योगषोडशकस्यार्धमष्टौ दिनपंचगुणानि चत्वारिंशद्दत्तानि भवंति तथा प्रथमदिने रूप
दशकं दत्तमनन्तरं द्वितीयेऽह्नि पञ्चैकरूपह्रासेन तिथि यावद्दिनानि पंच तेन प्रथमे दिने रूपदशकं दत्तं यावत्
पंचमे रूपषट्कं तद्योगस्य षोडशकस्यार्धमष्टौ दिनपंचकगुणानि चत्वारिंशद्दत्तानि भवन्ति तदेतच्चत्वारि
दिनानि प्रत्यहं दशदशदत्तानि। अष्टौ वा दिनानि प्रत्यहं पंच पंच दत्तो धनेन साम्यं भजेते तत्तिन्याय्यमेवार्धदानं

क॰ श्री॰ ८२

82

शेषस्य सर्वस्माद्विशुद्धस्य मार्गस्य प्रमाणानुसारानन्तं परिस्फुटमेवेति । उदाहरणम् ॥ ऊनपंचयोजनमन्यष्ठेनीय
मानेभूते सति शतद्वयेन तैलस्य पलानां पंचभिः पणैः तदर्धः सुविरं जातं तेन तैलं क्रमाच्च्युतम् पलानां
विंशतिः शेषो भाटकं किं प्रदीयताम् ॥ पंचभिः पणैरष्टौ योजनानि तैलपलशतद्वयस्य पूर्णे स्त्वह भाण्डेन नेयमि
ते धर्मस्थ्यधिद्वतान्यथिक्रमगलत्तैलेन गन्तव्यदेशं प्राप्ते न गलितशेषं तैलपलविंशतिर्दृश्यते तत्र किं तद्भाटकं दी
यतामिति गलितशेषयोर्भाटकानयनार्थं पंचराशिद्वयं यथा अष्टभिर्योजनैर्यदि पलशतद्वयस्य पणपंचकं त
दशीत्युत्तरशतस्य तैरेव योजनैः किमिति न्यासः ८ २०० ५ | ८ १८० नीते फले न्यस्ते त्रिमितिलब्धपणाः ९/२ तथाष्टभि
र्योजनैर्यदि पलशतद्वयस्य पणपंचकं भाटकं तदैव अष्टभिरेव योजनैर्विंशतेः किमिति न्यासः ८ २०० ५ | ८ २०
नीते फले न्यस्ते त्रिमितिलब्धपणः १/२ अत्राशीत्युत्तरशतस्य पतितत्वाद्भाटकः किमिति तद्भाटकं सू
९/२ दलीकृतं ९/४ शेषस्य विंशतेः परिशेषमिति शेषभाटकेन १/२ तत्संयोज्य भाटकदानमेतत् ११/४ अथोत्तलब्धौ

पलैर्हेशो भूर्षं ९ पणाभावात्काकिनीलाभार्थं चतुर्भिर्गुणिताः शाद्दतोलब्धं काकिनीत्रयं ३ लब्धे

भारके अज्ञातपतितैलार्थं न्यासः ८ ८ / ५ ४ नीतेफलेन्यपदामिति लब्धं तैलपलानि ११ एतद्भग

द्व्यादपास्य शेषं ९ एतद्द्विगुणं पतित २ · ४ तं १८ शतद्वयाच्छेषं विंशतिः शेषः तथा पतितमशीत्यु

त्तरं शतं तेन वर्तितं परिकल्प्य शेषं तैलेन विभज्य संयोज्य तैलपरिमाणं देशान्तरे शतेनाज्ञातके वर्तितेन

ज्ञातपणपंचकज्ञानमन्यदपि नीतेफले इत्यादि नैव कार्यम् ॥ करणसूत्रमार्या ॥ पूर्वोनापरदिनांश

न्फलाहतान्त्र्यन्तकैः पृथग्गृत्वा पूर्वोनापरे निद्ध्याहानं व्याहान्तिशेषणनास्ते ॥ दिनग्रहणं पेन्तकग्रहणं

चोपलक्षणार्थं तेन परिच्छिन्नकालाद्य क्रियानिर्वाहनानियमत्विनदानेनियं दिनग्रहणं वा पुरुषैर्मध्या

न्कालाद्यंशेन पूर्वोक्तेदेशाद्दिशास्तिशेषणन्यथावाच्यावर्तमानेतदानीमविकलमेव यदादेयं तदादान

विभागवैशम्यशास्त्रोक्तेन क्रियद्धानव्यं ग्राह्यमपि वाः विकलमेव यथाकाले धनक्रियायां वा संभूयस

क॰ श्री॰ ८३

वृत्तानां पुंसां येन कालाद्यंशेन कश्चित्कश्चिद्व्यावर्त्तते कालाद्यंशाय यथोपपन्नयोर्वा पर्याप्तसाव्यावस्थायिता
निर्जानन्पूर्वकालाद्यंशहीनाः समस्तपुरुषदेयमिश्रफलगणिताः पृथक्पृथग्व्यावृत्तपुरुषशेषाशेष
ज्ञोनन्पूर्वकालाद्यैस्तात्कालिकसंख्याभक्ता यथोपपन्नरूपा यावत्सम भवं पूर्वं पूर्वं पूर्वैः पूर्वपूर्वाभ्यां पूर्वेण
च संयुक्ता यावत्स्युः सर्वे नैकेनचिदिति ततस्तत्कालाद्यंशपर्यन्तव्यावृत्तपुरुषसंख्योद्धृतपृथक्पृथग्ग
णिताः स्थानानुक्रमेणान्तराले व्यावृत्तपुरुषदायखण्डविभागप्रमितयो भवन्ति उदाहरणं॥ एकेनाय
ममेकं द्वैयामे दृष्टमन्यपुरुषेण सन् दृष्टं यामत्रयमपरेण दिनांतमपरेण नर्तकं पुंसे देयानि रूपाणि
षट्त्रिंशन्नवतिः तस्याः किं केन पृथक् देयं दृष्टानुसारेण केश्चिद्वृत्तिभिः पुरुषैरभिनयवस्तूनि रूपार्थि
भिरेवं वचसा नटः समादिष्टो यथा त्वयाद्य सकलमेव दिनमस्माभिः प्रेक्षितैरभिनयः प्रयोक्तव्यः ततः कु
तनियोगस्य नटस्य षण्णवतिर्दीनारा देया इति तत्कृत्वा स नटस्तान्प्रत्याह भवद्भिश्च नर्त्तिभिर्मह्यं षण्णवतिर्दीनारा दातव्या

83

अहंतावत्सकलमेवदिवसंनिजकर्मकरिष्यामि भवंतस्तुयदिकदाचिदस्मत्कर्तव्यागतपारंतेत्रामयथाद्या
वर्तिष्यंतेतदाकथमितिततस्तेनतमित्थमेवोचन् भवतांगीहूतंनैवेतन्नेयथासत्यमेवास्तुनूनमप्यत्नाहिनाहशपव
श्वेत्तकराततेताटशाएवकस्मिन्नपिप्रेत्तकलोचनपरंपरापातेनशुद्धंभवतिनचशुभंभवतिनान्यथातत्स्माद्योयांतरावा
वर्तिष्यंतेसमसमसमंरूपभागापन्नंसहस्रांशुसावेणविभज्यदास्यतिशेषंशेषंपुरुषंस्थापनिष्यतियावदस्यतएणंतस्था
यासर्वशेषंदास्यतियेनतत्तवषाएनवर्तते नूपमपिन्यूनंनभविष्यतीति अथतत्रहूचकानंतरंनेसावत्तुएंर्षुंसामग्रेसनंत
कोनर्तितंश्रेष्टेनायावद्दिनचतुर्भागोगतस्तदातेषांमध्यादेकउत्पन्नव्यापारोगतः त्रयः श्रेष्ठिकास्तिष्ठंतियावद्दि
नार्धमतिहृतं अथद्वितीयोपिपुरुषस्समुत्पन्नव्यापारोगतः यावद्दिनत्रिभागः प्रवृत्तः अथतृतीयोपिपुरुषउ
त्पन्नव्यापारोगतस्तत्रैकएवश्रेष्ठिकोऽवशिष्टो यावद्दिनंनंनैवसंपूर्णमितितत्रतेननष्टेनतावद्यथानियोग
पारंगमेनवेतनंमविकलमेवषाएनवर्तितंतामानेतस्यप्रेत्तकैःसमदर्शिभिः कियत्कियद्दातव्यमितिन्यासः ॥ ॥ ९

कु॰ श्री॰ ८५

84

१	१	१	१
१/५	१/२	३/४	१/१
५	२	२	१

देयं ९८ अत्र प्रथममेकैकः पुरुषो व्याहृत इति तानि रूपाणि यामचतुष्टयक्रमेण तेषामे
व दिनपाददिनार्धपादोनदिनदिनानां भविष्यद्गुणकत्वादुपरि न्यस्तानि यदुक्तं विन्यस्याधो
ऽल्पमिति प्रथमे दिनपादे चत्वारः प्रेक्षकाः ततो दिनदलांते त्रयः ततो दिनपादत्रयं द्वौ दिनां
ते यावदेक इति प्रेक्षकसंख्यापि यामद्वियामादिक्रमेणैव भविष्यद्भाजकत्वात्तेषामधः न्यस्ता छेदो हि भाज
को भाज्यायः स्यादित्यवगणिते रूपं इति सर्वेषु दिनभागेषु कथ्यमानं तत्रत्वात् ... नेकैकं दस्याम्येषु १/५ १/४ ३/५ ४/५
परमांत्यदिनभागः ४/५ पूर्वेण ३/४ ऊनः १/५ । स च दिनभागः ३/५ । पूर्वेण २/५ ऊनः १/५ । सोपि २/५ पूर्वेण
१/५ ऊनः १/५ । तस्मात् १/५ सर्वं पूर्वस्मात् पूर्वे ... प्रक्षत्तावेवस्थितिरिति जातं स्थाने चतुष्टये १/५ १/५ १/५ १/५ एतत्स्थाने
चतुष्टयं फलेन ९९ पृथक्पृथग्गुणितं स्वच्छेदेन ५ अपवर्तितं जातं २४ । २४ । ... । २४ प्रेक्षकः
५।३।२।१। क्रमादङ्कं जातं ८।८।१२।२४ ततः सर्वपरे २४ पूर्वेषु ८।८।१२। निहितेषु ५० ततो द्वादशासु १२।

पूर्वयोः ५।८ निहितयोः २९ ततोऽष्टके पूर्वस्मिन् ९ निहिते १४ घलांशस्सर्वाभावाद्यथास्वरूपमेव ९ तदिदंजातं
स्थानचतुष्टयं ९।१४।२९।५ एतच्चक्रमेण व्याहृतपुरुषसंख्यापकैकेन गुणितं तथैवेति लब्धोदान विभागः
प्रथमयामव्याहृतेन षड्देयानि द्विवार्थव्याहृतेन च तद्दशा त्रियामव्याहृतेन षड्विंशतिः सकलदिनव्याहृतेन पं
चाशत् पंक्तौ भवति षण्णवतिः द्वितीयोदाहरणं युगपत्कोशत्रितयं दशभिः पुरुषैः शतेनेनेतव्यां कोशे कोशे
तेभ्यो व्याहृताद्विविपंचनराः दशभिर्युगपद्वाहकैः स्वीनक्रोशानूह्य शतेनेनेतं युगपच्छक्तं तेयावन्तः क्रोशमेकं
दशापि पुरुषास्तत्रावुकाभासन् अथक्रोशांते द्वौ युगपद्वाहकौ व्याहृतौ अष्टौ वाहकाः शेषाः यावद्द्वितीयक्रो
शांतं ततोन्येपि त्रयः पुरुषा व्याहृताः पंचशिष्यास्तेयावत्सकलमार्गान्तमिति तत्र युगपद्वाहेन तावन्तो मा
र्गादर्धपर्यन्तवाहनभाटकेरूपमानं दत्तमेव तेस्तु युगपद्वाहकैर्विषमपरिश्रमैर्विषमवेतनं तेषामेकं कथं विभक्त
व्यमितिव्याहृतसंख्या मार्गभागसंख्या शिष्टवाहकसंख्या च पूर्वोदाहरणोक्तरीत्या स्थाप्यते व्याहृतिप्रदेशः

क॰
ग्रं॰
८५

व्या २	व्या ३	व्या ५
मा १/२	मा २/२	मा ३/२
वा ९	वा ८	वा ५

क्रमशोंत्रिभागः द्वौ क्रोशौ द्वौ त्रिभागौ त्रयः क्रोशा एकस्त्रिभागश्च निस्थापिताः यदर्थं सूत्रे दिनां-
शानि स्युक्तम् तत्र दिनग्रहणं कालावधेर्ज्ञापनार्थम्। तत्र प्रथममार्गभागः १/३। पूर्वेण ३/२।
ऊनः १/३। सोपि २/३ पूर्वेण ३/२। ऊनः २/३ तस्मात्तत्सर्वं पूर्वेणादः पूर्वेणैव प्रकृतौ तावदेव स्थितिरिति
जातं स्थानत्रये १/३ | १/२ | १/२ एतत्स्थानत्रयं फलेन १० पृथक्पृथग्गुणितं १०/३ | १०/२ | १०/२ | वा-
तानि वाहकसंख्याभिः १०।८।५ पृथक्कृते पृथक्कृतानि | १०/३ | २५/८ | २०/२ | एतेषु सर्वांत्यः २०/२
पूर्वयोः १०/३ | २५/८ निहितयोः ८५/२४ | ततो मध्यमः २५/८ | पूर्वेण १०/३ सहितो जातः ८५/२४ | प्रथमः सर्वा-
भावात्पृथक्तस्य एव १०/३ तदिदं जातं स्थानत्रयं | १०/३ | १५/२ | ८५/८ | एतत्क्रमेण पृथक्पृथक्प्रदेशतो व्याहृतवा-
हकसंख्याभिः २।३।५ गुणितं | १०/३ | ४५/२ | ४२५/८ | पथवाहकानां भाटकविभागः प्रथमस्य रूप
३। शेष १/३। ततीयस्य रूप २२। शेष १/२। ततीयस्य रूप ७० शेष ५/८ एतदैक्ये भवति भाटकम्॥

85

तृतीयोदाहरणं॥ शिवस्य पंचवक्त्रस्य पूजायां सर्व पंचके रूपत्रिमात्या पंचैव ब्राह्मणाः स्तोत्रपाठिनः निमंत्रि
ताः केनचित्तैश्चैकैकमुखपूजने समासेक्रमशो याताः तेषां कादक्षिणा वद॥ पंचवक्त्रस्य सदाशिवभट्टार
कस्य केनचित्पूजायां प्रस्तुतायां पंचस्तोत्रपाठिनः शतत्रयेण रूप्याणां दक्षिणया भगवत्स्तोत्रोपहारसंपाद
नायाभ्यर्थिताः ते कृतान्युपगमास्तत्पूजावसरे पंचापि युगपत्स्तोत्रं पठितुं प्रवृत्ताः यावत्प्रथमवक्त्रपूजासं
पन्ना ततएकः स्तोत्रपाठी समुपजातव्यापारउपपत्रं दक्षिणाभागं परिगृह्य गतः ततो द्वितीयवक्त्रपूजायां
चत्वारः स्तोत्रपाठिनः स्थिताः यावद्द्वितीयवक्त्रपूजांतं अथ द्वितीयोपि पाठकस्तथैव गतः शेषस्त्रयः याव
तृतीयवक्त्रपूजांतं अथ तृतीयोपि पाठकस्तथैव गतः, शेषौ द्वौ यावच्चतुर्थवक्त्रपूजा ततश्चतुर्थोपि पाठको
निवृत्त एक एवावशिष्टः पाठकः यावत्पंचमवक्त्रपूजा ततः सोपि निवृत्त इति तेषां को दक्षिणाविभाग इति अत्र
वक्त्रसमुदाया रूप्यत्वेन कल्पित इति प्रथमवक्त्रे पंच भागाः चतुर्थवक्त्रे चत्वारः पंचभागाः पंचमवक्त्रे पंचपं

क॰
श्री॰
८९

वभागाश्रितेषां पादकैः सह व्याहृतैस्त्रसहस्यापनं द्वयं ३॰ पूर्वेणापरदिनांपातानि कृत्वा जातम्।

१	१	१	१	१
१/५	२/५	३/५	४/५	५/५
५	४	३	२	१

५/५	५/५	५/५	५/५	५/५

पतत्पृथक्पृथक्फलेन ३॰ गुणि तेगुणपङ्क्तेदेनपंचभिरपवर्तिते ९०।९०।९०।

९०।९०। पृथक्पृथक्क्षेत्तकैर्भक्तं १२।१५।२०।३०। ९० पतेषुर्वेपुक्तानाना: १२।२०।४०।००।

१२७। व्याहृतापकैकेन गुणिताल्लदेवेति लब्धादक्षिणाविभागः श्रुतिः ३॰ ननुप्रथमस्य पुरुषस्यतावत्प्रथमोदाहरणेषण्णवति मध्याद्यपद्यते रूपाणि षडुदात्तव्यानि यतः षण्णवतिस्त्रतुर्भिर्यत्र दीयते तत्रैकेनचतुर्विंशतिस्तत्रदिनचतुर्भागेन षडेवभवंति द्वितीयादीनितत्वान्यफलानि भवितव्यमर्हति तथाचसर्वेषां पंचराशिकेन्यासः

१	४
४	१
९६	

नीतेफलेन्यपत्तमितिलभ्यंतेरूपाणि ९ षण्णवतेः पातयित्वा शेषं ८७ अत्राप्येकेनदिनेनय दित्रिभिनेवतिर्दीयते तदेकेन पुरुषेणदिनपादद्वयेनकिमितिन्यासः

१	१
३	२
६०	१

नीतेफलेन्यपत्तमितिलभ्यते १५ पंचदशनवतेः शोधयित्वाभवंति ७५ अत्राप्येकेनदि

86

नेनहाभ्यांदीयते पंचसप्ततिः तत्रिभिर्दिनैः पादैरेकेनकिमितिन्यासः | १ | ३ ४ | श्रतो लाभात्तु पपद्यते | २२५ ८ |
पतन्येच सप्तते: शोधयित्वाशेषं २२५ ८ चेकेनदिनेनेद्रव्यकस्य पुरुष | ३ ४ | १ | स्यादेयं भवति चेषांपु
तिः षण्णवतिरिति अत्यल्पमिदन्तु च्यते इदमपि वक्तव्यं यत्तु तत्र षोडशभागभागी प्रथमः पुरुषः त्रि
भागाश्च विंशतिभागद्वयभागी द्वितीयः द्विभागात्पादत्रयभागी तृतीयः रूपभागी चतुर्थः तेषां षण्णवति
र्देये ति प्रक्षेपगणितेनैव फलं सिध्यतीति तत्र यात्पदेव फलमस्तु तत्फलनार्थं चैष न्यासः | १६ | ९३ ८ | १ | फलमि
श्रं १ स्वयुति ९८ एतन्प्रक्षेपा नितिभवितव्यमेभिः फलैः | २८८ ९७ | ९५८ ९७ | १७२८ ९७ | ५६०८ ९७ | पृथक्श्चा लेयः
तथाद्वियदाप्रथमयामादेवैकः पुरुषो व्यावर्तते तदा ता त्कालिकेनैव विभागेन सर्वे
समयनभवाः तत्र यव्याहृतः पुरुषो यथा षड् ददाति एवमेन्यत्रयोपि षडेव दातुमर्हन्ति तावता काला
शेनतावन्तो द्रव्यकानोपकस्य या व्यवस्थां तां पुरुषांतरेषि न लंघने हेत्वाभावात् अतः प्रथमयामे प्रतिपु

कृ॰ रुषस्यांशदानोपपत्तेः चतुर्विंशतिः परिनिश्चिता भवति किंतु व्याहृतस्य तदनन्तदर्शानत्वात्तावदेव दानं अन्येषां
श्री॰ दानव्यांतरसहितं भविष्यति तथा च चतुर्विंशतिविहीनायां षण्णवतौ जातायामेकस्मिंश्च शेषे तु एके व्याहृते ह्रास
८७ मतिर्द्वयमिश्रमवशिष्यते त्रयश्च शेषकास्त्रयस्त्रयामाः ततो द्वितीययामान्ते द्वितीयपुरुषस्य व्याहृतस्य प्रथ
87 मयामोपपन्नं रूपषट्कं दानव्यान्तयानिर्णीतं स्थितमेव द्वितीययामे तु तस्य किं स्यादिति ह्रासमतेः पुरुष
विभागाच्चतुर्विंशतिः यामविभागादष्टाविति व्याहृति कामलश प्रथमयामोपपन्नषट्केन सह रूपचतुर्दश
कं प्रदातुमर्हति एवमन्यावपि॥ किंतु तयोरव्याहृतत्वाद्दानव्यान्तरसहितं भविष्यति तथा च ह्रासमतेरपि
चतुर्विंशतौ पतितायामष्टाचत्वारिंशद्द्वयमिश्रमवशिष्यते शेषकौ द्वौ यामावपि द्वाविति ततस्तृतीय।
यामान्ते तृतीयपुरुषव्याहृतिप्रसंगे तत्स्य प्रथमयामोपपन्ना निषट् द्वितीययामोपपन्नान्यष्टौ चेति च
तुर्दशकं दानव्यान्तयानिर्णीतं स्थितमेव तृतीययामे तु तस्य किं स्यादित्यष्टचत्वारिंशतश्चतुर्विंशति पुरुष

विभागात् चतुर्विंशतेर्यामविभागाद्द्वादशेति शाकेन यामद्वयपृथक्पृथगुत्पन्नदेययोगेन चतुर्दशाके
नसहषड्विंशतिमेव दातुमर्हति एवमन्योपि किंतु न स्याद्व्याहतत्वाद्द्वात्रिंशतरसहितं भविष्यतीति तथा चा
ष्टचत्वारिंशतः स्य चतुर्विंशतौ निष्टमायां चतुर्विंशतिर्विशिष्यते पुरुषविभागो नास्ति नापि यामविभाग इति
सा विभक्तैव शाकेन यामद्वयपृथक्पृथगुत्पन्नदेययोगेन षड्विंशत्या सहिता पंचाशद्देनस्य देयमापद्यते य
दनुसारेण सूचितवानाचार्यः पूर्वान्तरे निरस्यादिति यदेव हि पूर्वे वितरेत्तत देवान्तरेपि किंतु स्यामोप
पन्नदेयसहितमिति न्यायात् अथ यच्चोक्तं तत्पूर्वोनापरादिनो शान्फलाहतानि तत्रेको भिप्रायः अय
मभिप्रायः प्रथमोदिनो प्राप्यकयामात्मकः। सएव भागप्रमितये भवति द्वितीयस्तु द्वियामात्मको
यद्यपि तथापि शाकेन दिनभागेन सर्वेषां देयाया व्यवस्थायाः कृतत्वात् हि हीनएव स व्यवस्थापकोभ
वितुमर्हतीति यावत्सर्वांशः सर्वपूर्वविहीन इति यत्तु फलाहतानि तत्रेकोयं प्रकारः सत्यं यद्यपि पूर्वं

क· श्री· ८८

प्रथमयामपर्वफलेनन्यूनत्वउपपद्यतेतस्यतद्दासकलत्वात् यामांतरेषुतत्तस्याविहीनत्वान्नेति तथापिप्रथ
मयामहीनस्यकालस्यविभागत्रयस्यावेद्वितीययामस्त्रिभागउपपद्यतेतथाचह्रासमासस्यागुणनाच्छेदनापवर्त
नेचतुर्विंशतिर्भवति प्रेह्नितकैस्त्रिभिरपिभागाद्दयाविति किंतत्तस्याद्वितीययामस्यपूर्वोनापरद्विनोयानितिक्रि
ययाचतच्छेदत्वमवशिष्यमाणंचतुर्भागहीनत्वफलस्यकुर्यात् अतश्चतुर्भागाधिकपर्वगुणएवः कल्पितः अ
थोच्यतेप्रथमोयामश्चतुर्भागः द्वितीयस्त्रिभागः तृतीयोद्विभागः चतुर्थोरूपमितिकिंनसरूपेणैवस्याच्यते
षण्णवतिह्रासमासष्टाचत्वारिंशाच्चतुर्विंशाद्भिरेवकिमितिनशंप्यतइति उच्यते पृथक्पृथग्गुणस्त्रेण
गुणकस्त्रेणचक्रियमाणेमहत्क्लेशंकृतंस्यात् यथावंपंचवाणिचतुष्टयमेवसर्वसूर्वस्पृद्धिसहितंश्रेयः
स्यादिति॥ करणसूत्रं॥ भागैर्विभज्यरूपंपृथक्पृथक्तत्प्रयुतिंप्रकुर्वीत विभजेत्तनयारूपंवापीपरिवृत्तणेका
लः॥ यत्रकालस्याभिमतस्यभागैरंशैः किंचिद्वत्स्यपकैकशोपिसंपन्नाभिमतत्स्वरूपंकैश्चिद्वत्स्त्रभिर्जो

यत्नेत्तत्रैतैर्वस्तुभिस्तत्तद्वस्तुरूपसंपादनाय युगपद्व्याप्टतैर्निजकालांशान्स्तेन कालेन शीघ्रमेव तत्कर्म कर्त
व्यं किं तु कियता कालेनेति जिज्ञासितैः पृथक् पृथक्तत्संपादकवस्तुसंबंधिभिः कलांशैः पृथक् पृथगे
करूपैर्विभक्तैर्यैस्तैरूपं हृतं युगपदभिमतवस्तुरूपसंपादनकालो भवतीति॥ उदाहरणं॥ दिवसार्धपाद
पंचमषड्भागैः स्रवयंति या वापीं ताः समकालविमुक्ताः प्रणालिकाः स्रवयंति कदा प्रणालिकाचत
ष्टयवती वाप्यस्ति यास्त्वेकैकशो मुक्ता सत्यस्मादिनसार्धेनैकस्याः पादेन द्वितीयस्याः पंचभागेन तृतीयस्याः
षड्भागेन चतुर्थ्याः स्रवणं भवति यदा युगपन्मुक्तास्तास्तदा कियता कालेन सा पूर्यत इति न्यासः

1	1	1	1
२	४	५	६

एतैः कालांशैः पृथक् पृथग्रूपाणि रूपे छेदेन हृते छेदगमो भागभागविधिरिति विभक्तानि।
जातानि २।४।५।६ एतानि युतानि १७ एतेन रूपे भक्ते $\frac{1}{17}$ । एतावताभिः प्रणालिकाभिः समकालविमुक्ता
भिर्वापीपरिस्रवणस्य कालः तथा च यया प्रणालिकया मुक्तया दिनदलेन सा वापी पूर्यते तस्याः सकलदिन

क॰
श्री॰
८९

शुक्ता वापीद्दिनत्रयपरिपूरणेन तत्वं कालं वहति तथाच यदि दिनपादेन सा वापी चतुष्टयपरिपूर्णेन तत्वं यथाचदि
नपंचभागेन सा वापी पंचपरिपूरणेन तत्वं यथाच षड्भागेन सा वापी षट्कपरिपूरणेन तत्वं एताच्चुक्तस्योपगपक्तु
क्ताः प्रणालिका यदि सप्तदश वापीर्दिनेन पूरयन्ति तदैकां वापीं कियता दिनभागेन ति सप्तदशभागो दिनस्यु
क्तः एतस्य च त्रैराशिकस्य स्थललाघवार्थमाचार्येण पंथाः प्रदर्शितः यतश्च कालविशेषो जिज्ञासितः तत्सजा
तीयो मध्यमराशिः कालात्मकः यस्य स कालविशेषो जिज्ञासितः स इच्छाराशिर्वाप्यात्मकः ज्ञातवाप्यात्म
कः प्रमाणराशिः तदुक्तं विभाजेनतयात्रूपमिति अत्र च दिनसंख्यायां रूपस्य मध्यमराशेर्वापीसंख्यायाश्च रू
पस्येच्छाराशेर्वधे रूपमेव भवतीति रूपयोर्वधावधे विशेषाभावादेकस्य रूपस्य रूपद्वयवधस्याप्येकतरोपे
क्षणं कृतमाचार्येण येन त्विह भागहारः स प्रथमराशिके जिज्ञासितत्वेन स्थितः भागलब्धमिति रूपत्वात्
अतस्तत्सजातीयो वाप्यात्मैव तत्र मध्यमराशिः सा च वापी एका दिनभागेनैकभागो वापीपूरणस्य ज्ञातत्वाद्दिनस्य

वापीसंख्याविशेषोनिघ्नास्मिन इत्ति दिनमिश्रा राशिः दिनभागाः प्रमाणराशिः इहापि वापीसंख्यया रूपस्य दिनसं
ख्यायाश्च रूपस्य वधे ऽवधे वापि विशेषाभावादेकत्र रोपेक्षणं कृतं यद्वक्ते भागैर्विभज्य रूपं पृथक् पृथक् फलयुतिं प्रकु।
र्वीतेति प्रति कालांशं पृथक् पृथक् समस्तेन वापीपरिसमाप्या पृथक् पृथगेव कालांशभक्तानि रूपाणि विधाय
तत्फलयोगः कृतः तदयं त्रैराशिकयोः क्रमान्न्यासः

२	१	१
१४	१	१
१५	१	२
१९	१	१

२	१	१
४	१	१
५	१	१
६	१	२

करणसूत्रमार्या ॥ पृथगर्घभांडभाट।
कवधोनभांडार्घवधात् दलवर्गात् मूलेन हीनभांडा
र्गमियता भांडेन भाटकेन यान्ति भारेण तत्र वाहेति व्यापारि
धहृतिदलं मार्गशेषहृतं ॥ इयं तं मा
तेन भारद्वारेणायदा भारहारं तत्रेण स
भारो हारयितुमिष्यते तदा सकलमार्गो नियमितभाटकादात्मनः किंपरिगृहीतव्यं गृहीतस्वहुभारवाहस्य।
मार्गशेषात्किं दातव्यमिति गत्तगंतव्यक्रोशादिभावेनार्धनिविभक्तेन योः द्वंडार्घनोस्तथा भांडस्य भाटकस्य च वधा
तेन रहितात्समस्तार्घभांडवधवर्गात् हीतेन मूलेन रहितं भांडार्घवधात्तार्थं गंतव्यमार्गभक्तं मध्यमभारहारयात् २

क॰ भारकं भवतीत्यर्थः तत्परिशुद्धसमयद्रुभाटकशेषं द्वितीयभागद्रावभाटकमिति उदाहरणं पनसवचनत्रयिक।
श्री॰ विंशतिमभ्यंतरभाटकेनयतः पंचकोशान्नवभिः पनसैः कोशद्वयेकिं स्यात् वत्तविंशतिपनसस्थतेभारंतदभ्यंतरस्थ
९० नवपनसभाटकनियमनयाकोशपंचकंनयतः कोशद्वयान्वितस्यकिंस्यात् २४।५।९। मार्गसंज्ञा ५ अस्यग
तगम्यविभागः को २ को २ भांडं २४ भारकं ९ पनसाः पक्षांवधः १२९९ भांडस्य २४ अवधनः ५ घातः १२ दलं ९
वर्गः ३९ ... एतत्पथगांघभांडभाटकवधेनदर्शितेनानेन १२९८ ऊनमू २३ ४ अन्तोमूलं ४८ एतेनभांडाद्यहतिद
लं ९ हीनं १२ मार्गशेषेण २ हृते ४ लब्धं प्रथमभारहारस्यभाटकं एतन्नवभ्यः शोधयित्वाशेषं ५ द्वितीयभारहार।
स्येति॥ प्रथमद्वितीयभारसेपरभृतिगुणितौसमान्वितौछेदः लब्धभृतिमार्गघाते परभरगुणितेभवन्पथा॥ उद्द।
ष्टोभारोज्ञातमार्गभाटकः कियतापथखंडेनज्ञातभृतिर्यदातदामार्गविभागजिज्ञासायांयौतौप्रथमद्वितीयौ
भागौपरभृतिगुणितौप्र थमभारोद्वितीयभृत्यागुणितद्वितीयभारः प्रथमभृत्यागुणितस्तन्निपरस्परसंवेधि

80

भृतिगुणितौ संतौ गुणाप्यकराशितामापाद्य भाजकः कर्तव्यः कस्मैताह लब्धभृतिमार्गैर्योते एष्य कृत्स्नलब्धभृ
तौ श्रविभक्तमार्गगुणिते परभरगुणिते तयोः पर्वं सति मार्गविभागो भवति उदाहरणं पनसचतुरधिकविंशतिरेतन्भृ
त्याचतुर्भिरेकेन नीताः तद्भृतिहीना पंचभिरपरेणोत्कृष्टेण क्रोशानां च द्वाभ्यां भारः समपष्ठमुद्युष्ठः केनकिय
तेभागे मार्गे सोस्तुच्यतां विद्वन् चतुर्विंशतिपनसभृतेभारं केनविदभ्यंतरभाटकेन नयता क्वचिन्मार्गैकदेशे नी।
त्वा तद्वाराभ्यंतरात्पनसचतुष्टयं भृत्यर्थं गृहीते ततस्तद्भृतिहीनं विंशतिपनसभारं अन्येनोत्कृष्टेण मार्गात्तं नी
त्वा तद्वाराभ्यंतरात्पनसपंचकं भृत्यर्थं गृहीतमिति पनसचतुरधिकविंशतिरूपो भारो द्वाभ्यां पुरुषाभ्यां समनुद्युष्ठः
पथः क्रोशपंचकं प्रापितो ये तैस्तत्रनत्तायते प्रथमेन कियतः क्रोशान् परेण कियत इति न्यासः प्रथमो भा
रः २४ भृतिः ४ द्वितीयो भारः २० भृतिः ५ प्रथमभारो २४ द्वितीयभृत्या गुणितः १२० द्वितीयभारः २० प्र
थमभृत्या गुणितः ८० एतयोर्युतिः २०० एषच्छेदः एतयोः तत्र यथा प्रथमोत्कृष्टेण लब्धा भृतिः ४ मार्गेण ५

क· हता २· द्वितीयपुरुषेणलब्धा भृतिः ५ मार्गेण ५ हता २५ क्रमेणस्थापितेएते २·।२५ अनयोराद्यः २· द्वितीय।
श्री· भावेन २ गुणिताः ४·· द्वितीयः २५ प्रथमभावेन २४ गुणितः ८·· एतौक्रमस्थापितौ ४··।८·· प्राग्दर्शित।
८१ च्छेदेन २·· छिन्नौ लब्धौक्रमात्प्रथमपुरुषस्याध्वाक्रोशौ २ द्वितीयपुरुषस्याध्वाक्रोशाः ३। एकाद्युत्तरविधि
नारसविन्यासेविलोमतोगुणयेत् पूर्वेणपरंक्रमशोरूपादिचयैर्हरैर्विभजेत् ॥ रसेसुपलक्षणम्॥ तेना।
नेकस्यवस्तुनएकैकयोद्विशस्त्रिश इत्यादिव्याप्तेभवेच्छुद्धसंसर्गभेदसंख्यातिज्ञासयावस्तुसंख्याक्रमेण।
रूपोत्तरत्वेन पृथक्पृथक्स्थाप्या यावद्रूपम् एषएवविलोमतएकाद्युत्तरविधिनावस्तुसंख्यान्तोवि।
न्यासः कृतोभवति एत स्यवि एतस्यविन्यासस्यप्रथमस्थानस्थाया रूपंन्यस्येत् द्वितीयस्थान।
स्थेरूपत्रयादिरूपहरू ध्यायावदेतत्स्थाने तत्रोपरिन्यस्तानांप्रथमोराशिरधःस्थितेनरूपेणभ
क्तोसंसृष्टएकवस्तुसंख्याभवति त त तयासंख्ययाद्वि मी यस्थानस्थितेनापि

गणयेत् स्वाधस्थिताभ्यां द्वाभ्यां छिंद्यात् द्विसंसर्गभेदसंख्या भवति तयासंख्ययात्तृतीयस्थानस्थितं राशिं गु
णयेत् स्वाधस्थितैस्त्रिभिश्छिंद्यात् त्रिसंसर्गभेदसंख्या भवति एवं लब्धैः सर्वैर्भेदसंख्याफलैर्गुणिता उत्तरो
त्तरराशयः स्वाङ्कैः स्थितैश्छिन्नाश्चतुःसंसर्गादिभेदा भवंतीति॥ उदाहरं तिक्तकटुकषायाम्ललवण
मधुरैः सविरसैः षड्भिः विख्यातिसूपकारव्यंजनमाचक्ष्व कतिभेदं॥ कटुतिक्तकषायाम्ललवणमधुर
रसैः सूपकारो व्यंजनानि करोति एकरसद्विरसादिभेदैर्विविचित्रविधाभिस्ततदानानि व्यंजनानि कतिभेदा
नि भवंति स्थापने रसाः ६ कर्मयषांकसंख्या प्रथमस्थाने ६ रूपोने ५ द्वितीयेभवे यावत् १ एषान्या
सः ६।५।४।३।२।१। एषामथारूपादिचयेन राशयो यथासंख्येन्यासः १।२।३।४।५।६ जातं स्थापने।
६।५।४।३।२।१। अत्र प्रथमस्थाने ६ स्वाङ्कैः स्थितेन १ भक्तं ६ एते एकरसभेदाः कटुकः तिक्तः
१।२।३।४।५।६।

क॰
श्री॰
९२

82

कषायः अम्लः लवणः मधुरः एतैः ६ अनन्तरस्यानं ५ गुणितं ३० स्वाधस्थितेन २ भक्तं १५ एते द्वि

रसभेदाः यथा कटुकतिक्तौ कटुकषायौ कट्वम्लौ कटुलवणौ कटुमधुरौ तिक्तकषायौ तिक्ताम्लौ तिक्त

लवणौ तिक्तमधुरौ कषायाम्लौ कषायलवणौ कषायमधुरौ अम्ललवणौ अम्लमधुरौ लवणमधुरौ

तैः पंचदशभिरनंतरस्यानं ४ गुणितं ६० स्वाधस्थितेन ३ भक्तं २० एते त्रिरसभेदाः यथा कटुकतिक्तक

षायाः कटुकतिक्ताम्लाः कटुकतिक्तलवणाः कटुकतिक्तमधुराः कटुकषायाम्लाः कटुकषायलवणाः

कटुकषायमधुराः कट्वम्ललवणाः कट्वम्लमधुराः कटुलवणमधुराः तिक्तकषायाम्लाः तिक्तकषाय

लवणाः तिक्तकषायमधुराः तिक्ताम्ललवणाः तिक्ताम्लमधुराः तिक्तलवणमधुराः। कषायाम्ललव

णाः कषायाम्लमधुराः कषायलवणमधुराः अम्ललवणमधुराः एतैः २० अनंतरस्यानं ३ गुणितं ६०

स्वाधःस्थेन ४ भक्तं १५ एते चतूरसभेदाः यथा कटुतिक्तकषायाम्लाः कटुतिक्तकषायलवणाः कटु
तिक्तकषायमधुराः कटुतिक्तांललवणाः कटुतिक्ताम्लमधुराः कटुतिक्तलवणमधुराः कटुकषा
याम्लल वणाः कटुकषायाम्लमधुराः कटुकषायलवणमधुराः कट्वम्ललवणमधुराः तिक्तक
षायाम्ललवणाः तिक्तकषायाम्लमधुराः तिक्तकषायलवणमधुराः तिक्तांलमधुराः कषायाम्लल
वणमधुराः एतैः १५ अनेन रसस्थानं २ गुणितं ३० स्वाधःस्थेन ५ भक्तं ६ एते पंचरसभेदाः यथाक
टुकतिक्तकषायाम्ललवणाः कटुतिक्तकषायाम्लमधुराः कटुकतिक्तकषायलवणमधुराः कटु
कतिक्तांललवणमधुराः कटुकषायाम्ललवणमधुराः तिक्तकषायाम्ललवणमधुराः एतैः ६ अने 14
रसस्थानं १ गुणितं ६ स्वाधःस्थेन ६ भक्तं १ एष षड्रसभेदाः कटुतिक्तकषायाम्ललवणमधुरा इति

कृ· एषां भेदानां ६।१५।२०।१५।६।। युतिः ६३ एते व्यंजनभेदा भवंति ।। पूर्वमेभेदसंख्यानीतेति तत्प्रस्तारस्य
श्री· प्रमत्तगौनिदर्शनार्थं पौनरुक्त्यविस्मरणनिवृत्त्यर्थं श्रुतिमाह ।। द्विरसव्यंजनसिद्ध्यै परेषु सर्वं विनिक्षि
९३ पेत्क्रमशः सर्वरसरहितयुतिषु आदिरसात् यं विनिक्षिपेत् सर्वं एकरसास्तावत्तु ज्ञाताः पाठेनैव सिध्यं
ति कटुः तिक्तः कषायः अम्लः लवणः मधुरः इति इदानीं द्विरसनिदर्शनाय यथा एषां सर्वेषां रसः कटुः
83 एतं परेषु तिक्तादिषु प्रक्षिपेत् कटुतिक्तौ कटुकषायौ कट्वम्लौ कटुलवणौ कटुमधुरौ एवं कटुको
रसान्तरयुक्तः पंचधेति कटुकः समाप्तः तिक्तस्य कटुनायोगः कटुतिक्तयोगेन गतः अग्रेरसैस्तु द्विन
दर्शयितव्यः तत्रापि कटोरपगमे तिक्त एव पूर्वं जातस्तमपि परेषु कषायादिषु प्रक्षिपेत् तिक्तक· ९३
षायौ तिक्ताम्लौ तिक्तलवणौ तिक्तमधुरौ एवं तिक्तः अग्ररसयुक्तश्चतुर्धेति तिक्तः समाप्तः कषायस्य कटु

तिक्ताभ्यां योगः कटुकषायतिक्तकषाययोगेन गतः उक्तैरेतैर्दर्शयितव्याः तत्रापि कटुतिक्तयोरपगमे
कषाय एव पूर्वं ज्ञातस्तमपि परेष्वम्लादिषु प्रक्षिपेत् कषायाम्लौ कषायलवणौ कषायमधुरौ एवं क।
षायउत्तरयुक्ताद्वियेति कषायः समाप्तः अम्ल इदानीं पूर्वस्तमयुक्तरयोर्लवणमधुरयोः प्रक्षिपेत् अम्ल
लवणौ अम्लमधुरौ एवमम्लउत्तररसंयुक्ताद्वियेति अम्लः समाप्तः लवण इदानीं पूर्व इति तं मधुरे प्रक्षि
पेत् लवणमधुरौ एवं लवणो मधुरयुक्त एक एवेति लवणोऽपि समाप्तः इत्येवं पंचदश द्विरसभेदाद।
र्शिताः इदानीं त्रिरसनिदर्शनं॥ तत्र याद्विरसयुतयस्तास्तयाः पूर्वरसयुतयः कटुतिक्ता त्रित्वादयस्ताव
र्जयित्वा शिष्टयास्तिक्तकषायावित्यादयस्ताएव पूर्वेण कटुकेन संयुक्तास्त्रिरसाः यथा कटुकतिक्तकषा

क॰ याः कटुकतिक्ताम्लाः कटुकतिक्तलवणाः कटुतिक्तमधुराः कटुकषायाम्लाः कटुकषायलवणाः कटुकषा
श्री॰ यमधुराः कट्वम्ललवणाः कट्वम्लमधुराः कटुलवणमधुराः एवं कटुत्रिरसादश इति कटुः समाप्तः इदानीं
८४ तिक्तत्रिरसादर्शयितव्याः तत्रतिक्तरसस्यवृत्तयोयास्तिक्तकषायौइत्याद्यास्तिक्तमधुरौइत्यन्तास्तद्वर्जितायाः कषाया
84 म्लौइत्याद्यास्तास्सर्वेतिक्तंनिक्षिपेत् तिक्तकषायाम्लाः तिक्तकषायलवणाः तिक्तकषायमधुराः तिक्ताम्लल
वणाः तिक्ताम्लमधुराः तिक्तलवणमधुराइत्येवंतिक्तत्रिरसाः षट् तिक्तोऽपिसमाप्तः इदानींकषायत्रिरसानिद
र्शयितव्याः तत्रकषायद्विरसवृत्तयोयाः कषायाम्लावित्यादयः कषायमधुरावित्यन्तास्तद्वर्जिताअम्ललवणा
वित्याद्यास्तास्सुकषायंप्रक्षिपेत् कषायाम्ललवणाः कषायाम्लमधुराः कषायलवणमधुराइति ॥ ॥

एवं कषायत्रिरसास्त्रयः कषायोपि समाप्तः इदानीमम्लत्रिरसा निदर्शयितव्याः तत्राम्लद्विरसयुतीये
अम्ललवणौ अम्लमधुरौ एते वर्जयित्वा लवणमधुरावित्यसंयुतौ अम्लं प्रक्षिपेत् अम्ललवणमधुरा इति
एवमम्लत्रिरसा एकः अम्लोपि समाप्तः इत्येवं विंशतिस्त्रिरसभेदा दर्शिताः इदानीं चतूरसेषु कटुकच
तूरसानि दर्शयितव्याः तत्रापि कटुत्रिरसान् कटुतिक्तकषाया इत्यादीन् कटुलवणमधुरा इत्येतान् वर्जयित्वा या
तिक्तकषायाम्ला इत्याद्यास्तासु कटुं प्रक्षिपेत् कटुतिक्तकषायाम्लाः कटुतिक्तकषायलवणाः कटुतिक्त
कषायमधुराः कटुतिक्ताम्ललवणाः कटुतिक्ताम्लमधुराः कटुतिक्तलवणमधुराः कटुकषायाम्ल
लवणाः कटुकषायाम्लमधुराः कटुकषायलवणमधुराः कट्वम्ललवणमधुरा इति एवं कटुचतू
रसा दश कटुः समाप्तः इदानीं तिक्तचतूरसा दर्शयितव्याः तत्रापि तिक्तत्रिरसांस्तिक्तकषायाम्ला
इत्याद्यान् वर्जयित्वा याः कषायत्रिरसयुतयस्तासु तिक्तं प्रक्षिपेत् तिक्तकषायाम्ललवणाः तिक्तक

क॰ षायाम्लमधुराः तिक्तकषायलवणमधुराः तिक्ताम्ललवणमधुरा इति एवं तिक्तचतूरसाश्चत्वारः तिक्तः समा
स्त्री॰ सः इदानीं कषायचतूरसा दर्शयितव्याः तत्रापि कषायत्रिरसयुतयः कषायाम्ललवणा इत्याद्याः कषाय
८५ लवणमधुरा इत्यंतावर्ज्याः अम्ललवणमधुरा इत्येतस्मामन्त्रिरसयुतो कषायं प्रक्षिपेत् कषायाम्ललवणमधु
रा इति एवं कषायचतूरसएकः कषायोपि समासः इत्येवं पंचदश चतूरसा दर्शिताः इदानीं पंचरसेषु कटु पंच
85 रसा दर्शयितव्याः तत्रापि कटुचतूरसान् कटुतिक्तकषायाम्ला इत्यादीन् कट्वम्ललवणमधुरा इत्यंतान्वर्जयित्वा
तिक्तकषायाम्ललवणा इत्यादिषु कटुं प्रक्षिपेत् कटुतिक्तकषायाम्ललवणाः कटुतिक्तकषायाम्लमधुराः
कटुतिक्तकषायलवणमधुराः कटुतिक्ताम्ललवणमधुराः कटुकषायाम्ललवणमधुरा इति एवं कटुपं
चरसाः पंच कटुः समासः इदानीं तिक्तपंचरसो निदर्शनीयाः तत्रापि तिक्तचतूरसांस्तिक्तकषायाम्ल
लवणा इत्याद्यांस्तिक्ताम्ललवणमधुरा इत्यंतान्वर्जयित्वा शेषे तिक्तं प्रक्षिपेत् तिक्तकषायाम्ललवणम

धुराइति एवंत्रिकपंचरसएकः त्रिकःसमाप्तः इत्येवंषट्पंचरसादर्शिताः इदानींषड्रसनिदर्शनम्।तत्र
याः कटुश्चेचरसष्षट्तयस्तावर्जयित्वाशेषेतित्र पंचरसेकटुंप्रक्षिपेत् कटुतिक्तकषायाम्ललवणमधुरा
इति एकएवषड्रसः तएवविषद्भिः रसभेदादर्शिताः। स्तंभशेषोद्देशकयोः करणसूत्रमार्यापूर्वार्धम्
स्तंभेशेषेचभजेद्दृश्यंरूपेणभागहीनेन॥ स्तंभस्यदृश्यमुपलक्षणार्थं तेनभागयोगशुद्धिदृश्यंयत्रकिंचिद्दृश्य
तेनत्र्योद्दिष्टभागयोगहीनेनरूपेणहृतंदृश्यंहरेदास्तंभपरोक्षावयववस्तुप्रमाणंभवति तथायत्रभागांतरशुद्धि
श्यंकिंचिद्दृश्यंतेनत्र्योद्दिष्टभागशेषहीनेनदृश्यंहरेदास्तंभपरोक्षावयववस्तुप्रमाणंभवति उदाहरणम् पा
दस्यांशाषडंशानयाजलपंकवालुकांतस्थाः स्तंभस्यकरत्रितयंदृश्यंतन्मानमाचक्ष्व अज्ञातमानस्यस्तंभा
देःअवयवस्तुनः केचिदवयवाः परोक्षाः केचित्प्रत्यक्षाः येपरोक्षास्तेनयाटिसंबंधिनोजलपंकवालुकादीना
मंतःस्थाः क्रमात्पादत्र्यंशषडंशात्मकत्वेनज्ञायमानाः यस्त्ववयवःप्रत्यक्षःसत्रिहस्तात्मकः तस्यैवमव

क॰ यस्य वस्तुनः किंप्रमाणं स्यादिति तज्ज्ञप्त्यर्थं न्यासः ५/३ १/३ ६/१ हृष्टं रूपं हस्ताः ३ सहृष्टा छेदांशा युतिः तल्लवेन भाग
श्री॰ जाताविति कर्मणा भागयोगः ३/४ एतेन हीनं रूपं १/४ एतज्ज्ञकं हृष्टं छेदांश विपर्यासे इति कर्मणा जाते
८९ १२ एतत्त्रैराशिकमानं तथा च द्वादशानां पादः ३ त्र्यंशः ४ षडंशः २ हृष्टं ३ युताः १२ इदं च स्वस्थं त्रैराशिकं चट
नार्थं यतः पादत्र्यंशषडंशा युता भवन्ति ३/४ एतद्विहीनं रूपं १/४ एतत्परिमाणे हृष्टपरिमाणस्य ३ तत्र रूपस्य प
रिमाणं न ज्ञायते तच्छतीच्छा राशिः तत्सजा ३/४ तीयो रूपपादो १/४ ज्ञातपरिमाणत्वात्प्रमाणराशिः जिज्ञासि
तपरिमाणसजातीयं परिमाणमेव ज्ञातं तन्मध्यमो राशिः एवं न्यासः १/४ ३ १ अन्त्यगुणमादिना विभजेदिति १२
शेषोद्देशके उदाहरणं ॥ अर्धं शेषात्त्र्यंशो शेषात्पादेन ये च परिशेषात् चत्वारः पंचांशा राशेर्दत्ता स्त्रयः शेषाः
कोऽसौ राशिर्यस्मात्सकाशादेवं दत्तं शेषात्स्यात्मकाहत्वं शेषो दत्तो न तच्छेषादपि पादत्रयं दत्तं तदवशेषादपि
चत्वारः पंचभागा दत्ताः तदावशिष्टाः त्रयो हृष्टं ते इति सभागापवाहीनभागमानीय करणार्थं न्यासः १/२

राशिः कल्पितो रूपं १ अतोऽर्धे पाते ८ वशिष्यते ऽर्धम् १/२ अनेन तृतीयमेव त्रिभागद्वयमपास्तिं न्यासः १/३ कर्मत्र
यत्र हरोऽर्धच्छेदवधे योंशोनहरवधकृतांशास्तेन जाते १/६ भागवत्सादनयापवाहे जाते १/२४ अतोऽपि १/२/३ पंचन
ष्ट्यापवाहे जाते १/२० एवं भागहीनप्रमाणमेतत् येन भक्तो दृष्टं रूपं भवति १ शिष्यमाणम् २९
तथा चातोऽर्धे यति ने शेषं १८ अनस्त्रिभागद्वये सं विशेशाते च्युते शेषं ९ अतोऽपि चतुर्भागत्रये पंचच
त्वारिंशति मुद्धायां शेषं १५ अतोऽपि पंचभागचतुष्टये द्वादशाके निष्टेने शेषं ३ एतद्दृश्यम् शेषोद्देशोऽपि स्त
भंते प्रक्रियया क्रियमाणो न दोषाय यथा अयं १/२ अर्थात् त्रिभागद्वयरूपत्रिभागः १/३ अर्थाद्रूपत्रिभागही
नात्त्रयस्त्रतुर्भागाः रूपाष्टभागः १/८ रूपार्थरूप त्रिभागरूपाष्टभागहीनानां च भागचतुष्टये रूपत्रिं
शद्भागः १/३० एषां स्थापनं १/२ १/३ १/८ १/३० एषां युतिः ११९/१२० एतद्द्विहीनरूपं १/१२० एतेन दृश्यं २ भक्तो
२४० तदिदं तत्सम्पूर्वं विशेषोद्देशकेकरणसूत्र। मार्यापरार्थम् ॥

५

क॰ अथिकाहूनम्यगमोविशेषइतिगदितोविधिरन्यः ॥ भागोद्देशस्याज्ञानस्वरूपत्वान्नहिविशेषोऽप्यज्ञातः कथं
श्री॰ स्थाप्यताम् अस्यापितेन तस्मिन्फलाप्राप्तिस्तदप्राप्तौ भागस्वरूपापरिज्ञानेन तद्विशेषालाभश्च ततोऽपित
९७ दिती तदेतत्राश्रयादगणितव्योमेनदिति पंथानं दर्शयति नात्र काचिच्छ्यग्रता कार्या योभागौ नहिविशेष
स्तोहिदृश्यते तो भागौ यथा भागात्मकत्वेनैव स्थाप्यते नहृद्यस्तद्विशेषोऽस्ति सोऽपि भागात्मक एव स्थाप्यः न
89 द्विशेषानयनं कथमिति चेत् अथिकादनष्टाहृतस्मात्तनष्टस्यगमो निवृत्तिस्तद्वत् षंविशेष इहसूत्रे प्रति
पादितः एवं भागेष्वल्पेष्वपि शिष्टो विधिः स्वंभशेषप्रक्रियामध्यादन्यतमो गदित एवेति उदाहरणम्
गोऽरूथ्यतोऽर्थपादौ द्व्यर्धापरगौ तयोर्विशेषोयः सद्विगुणः पंचहृतः सोऽस्मामगमत्रयः शेषाः ॥ तस्यगो
मंडलस्य किं प्रमाणं यस्यार्थे पूर्वां दिशं गते पादे च पश्चिमामर्थ्यपादांतरे द्विगुणे पंचहृते सोऽस्मात्रयोगावः
शेषा इति न्यासः १ १ / २ ५ एतद्विशेषः १ / ५ । द्विगुणः १ / २ पंचभक्तः १ / ० । इतीदं सूत्रयोजनाज्ञाने १ १ १ / २ ५ ० इदा

नौ पूर्ववत्सूत्रात्कर्म तद्यथा भागयोगः | १६ २८ | एतस्मिन्रूपात्पतिते शेषं | २ २८ | अनेन रूपं २ भक्तं द्वे दशभावविपर्यास
इति कर्मणा जातं गोहृद्दश्रमाणं २० तथाहि अत्रोर्ध्वं १०।पा दः ५ एतद्विशेषः पंचद्विगुणा दश
पंच भागाह्वाविति २। रूपं २॥ मूलादिशेषोद्देशेकरणसूत्रमार्या॥ मूलासन्नं च तन्गुणाद्रूपणान्तद्वर्गसे
युतान्मूलम् सपदं तदर्धवर्गो निरंशारूपेणाद्रूपयुक्तिः मूलासन्नं वा रूपं पस्मात् अंशासन्नं वा मूलास
न्नं चेन्नस्य तर्भिर्गुणयेत् ततो मूलसंख्या वर्गेण योजयेत् ततो मूलं च गृह्णीयात् तच्च तां मूलसंख्या।
क्षिपेत् अथ दलयेत् तस्य वर्गं ऊर्ध्यात् एवं वा हृदूपं भवति अथ यदि भागमन्त्रं रूपं तदा तदंशहीनेन
रूपेणारूपं विभजेदिति हृदरूपं भवति आसन्नकर्मणि कृते च यद्यदा साऽवहिंशति तेन तेनोनकवात्कर्मकर्त
व्यमिति। उदाहरणम्। मूलं शेषान्वहः शेषपदं शेषपंचमोदनः राशेः शेषस्य पदद्वयं रूपाष्टकेऽपि
ष्टं कोऽनु सवर्गराशिर्यस्य मूले दत्ते शेषस्य षड्भागे च शेषस्य पदे शेषस्य पंचमे शेषस्य मूलद्वये वाऽष्टौ ८

कु॰
श्री॰
५८

पाण्येवयोद्धं तदिति न्यासः मूलं १ शेषांशास्त्वः [६] शेषांत्यमूलं ४ शेषाः स्वाः [५] शेषांत्यमूले २ दृष्टं रूप
८ इदं मूलासन्नेदृष्टं ८ चतुर्गुणं ३२ पदसंख्या याः २ वर्गः ४ एतेन संयुतं ३६ अतो मूलं ६ पदसंख्यया २४
तं ८ अस्यार्धं ४ वर्गः १६ यद्येतावन्नदेतत्तदेव दृष्टं रूपं जातमेव तथाहि अस्मात्पदद्वयं ८ दृष्टं ८ यदा तत्पदद्वयं स्यात्तदै
तदेवमस्य पदे स्थितं भागासन्नं चातः पंचभागोनरूपेण ५/६ हृतैदिति जातं २० यद्येतावन्न देतदेव दृष्टं यस्य पंचभागः
४ शेषः १६ अन्यत्सर्वं पूर्ववत् अत्राप्युपरि यदा पदस्तं तदेव दृष्टं मूलासन्नं चेति चतुर्गुणं ८० मूलसंख्यायाः १व
र्गः १ युतः ८१ अतो मूलं ९ पदं १ सहितं १० तदर्धं ५ वर्गः २५ यद्येतावन्न देतदेव दृष्टं २५ अस्य पदं ५ शेषं प्राग्वत् अ
त्रोपरि संभवे पदं तदेव दृष्टं २५ अंशासन्नं चेति निरंशरूपेण ५/६ हृते ३० अस्य यः प्राग्वत् पुनर्मूलासन्नत्वाच्चतुर्गुणं
१२० पदवर्ग १ संयुतं १२१ संभवे ११ सपदं १२ तदर्धं ६ वर्गः ३६ एतद्दृष्टं तथाहि अस्य मूलं ६ शेषषष्ठः ५ शे
षपदं ५ शेषपंचमः ४ शेषपदद्वयं च ८ शिष्टं ८ दृष्टं ॥ भागमूलाग्रो दृश्यो करणसूत्रमार्या ॥ भागोनरूपहृ

98

तयोः पदाग्रयोरादिमार्धकृतियुक्तात् इतरः साध्यं मूलं तदादिमार्धान्वितं स्वगुणं भागेन भागयोगेन वा
हीनं यद्रूपं तेन मूलसंख्यां दृश्यं च भजेत् ततस्तयोर्मध्यादादिमं भागेन रूपहृतं मूलं तदर्धस्यानष्टवर्गेणा
युक्तमितरद्दृश्यस्थानं कार्यं ततोऽस्मान्मूलं गृहीत्वा अनेनादिमार्धेन युतं वर्गितं राशिसंख्या भवति उदाहरणं
वानरकुलत्रिभागः स्वत्र्यंशसमन्वितः सरः प्रययौ मूलं च पिपासार्तो द्वौ चूततले स्थितौ शेषौ तस्य वानरयूथस्य कासं
ख्यायस्य त्रिभागे स्वत्रिभागसहिते जलाशये गते तथा मूले तृषार्ते यातेऽवशिष्टौ द्वौ यत्र तत्तले स्थिताविति न्यासः | १/३ १/३ |
मूलं १ दृश्यं २ अत्र त्रिभागस्य स्वत्रिभागेन योजनार्थं अधरहरघ्नोर्ध्वहरे योंशयुतहरघ्न आद्यांश इति कार्यो
जायते | ४/९ | एतेन भागेनोनं रूपं | ५/९ | एतेन हृते पदे दृश्ये च | ९/५ | १८/५ | आदिमस्य ९/१० | अस्य कृतिः ८१/१०० | अनेन
तरत् १८/५ सवर्णनाद्द्विघ्नात्मा | ५/९ | गुणितेऽवच्छेदांशं २९. | ५/५ | युतं जातं ४४१/१०० | अतो मूले | २१/१० | एत
दादि | ५ | मार्धेन ९/१० अन्वितमपवर्तितं ३ स्वगुणं ९ | १०० | एषा वानरयूथ | १०० | संख्यायस्याश्च | २१/१० | भागः ३

क. नस्य त्रिभागः १ मूलं २ हीनं रूपमवितिः। उभयाग्रमूलशेषोद्देशेकेन करणसूत्रमार्या। शेषांशादीन् रूपाभ्यासः प
श्री. दृष्टयोर्वधः प्राग्वत् लेपस्य योर्हीनीये सर्वाग्रे प्राग्विधिः शेषः॥ शेषस्य राशेर्ये भागास्तैः पृथक् पृथग्रूपा।
५५ एस्नानि कुर्यात् ततस्तेषां तथा कृतानां रूपाणां सर्वेषामेवभ्यासः कर्तव्यः तेनाभ्यासेन पदं तथां सह दृश्यं विभ
99 जेत् ततः पदं कृतं सह दृश्ये सर्वदृश्यं प्रक्षिपेत् शेषविधिः प्राग्वत् आदिमार्थं कृतिर्युक्तादित्र स्याद्यन्मूलं तद
दिमार्थान्वितं सगुणमिति। तथा चाह- उभयाग्रविधिं कृत्वा पूर्वाग्रे तेन गुणावाप्तं आदिमार्थं कृतीत्यादि प्राग्
विधिं शेषमार्गे ददिति उदाहरणं॥ रूपे शेषात्स्वष्टे शेषचतुर्थे च शेषतत्संशे सर्वं धनस्य च मूले दृष्टे पंचावशि
ष्टानि। कोऽनु स राशिः यस्य रूपेदत्ते शेषादपि षड्भागे तच्छेषादपि च तुर्भागे तच्छेषादपि त्रिभागे सकलधनस्य च
मूले पंचावशिष्टानि इति न्यासः रू १ शेषात् १/६ | शेषात् १/४ | सकलधनस्य मूलं १ दृश्यं ५ शेषांशाः |१/६|१/४|१/३
एतैः पृथक्पृथग्रूपाणि हीनानि |५/६|३/४|२/३| एषाम् |४| अभ्यासः ३०/७२ एतदपवर्तितं |५/१२| एषाम्

लब्धं १ अंत्यमेकपरस्य वास्य ५ हरइतिजाते [१२/५] अनयोः द्वितीयेस्मिन् [१२/९/५] पूर्वाग्रं १ क्षेपइतिजाते १२ अस्मिन्वा
तिविधिः शेषइत्यतिदेशात् आदिमस्यास्य [१२/५] अग्रं ९ । अस्यक्ष[?]
क्षेति ३६ । क्षेपइतिजाते ३९ अ
तोमूलं १९ [५] । एतदादिमार्येनांशे [९] । अन्विते २५ [५] स्वद्वेदेनापवर्तितंजाते ५ । २५ । एतत्स्वगुणं २५ [२५] एष
सराशिः यस्मात्स्वरूपं १ शेषाणां ४ । शे षचतुर्थः ५ शेषत्र्यंशः ५ शेषात्सकलराशिमूलं ५ अवशि
ष्टानि ५ विपरीतोहेयाकेकरणसूत्रमार्या एतमपचयः तयोयनमथगुणकारोहरोहरोगुणक्षतवर्गः पदंपदंकृ
तिरिति विपरीतेविधिर्दृष्टः यत्रयोगापचययगुणनभागवर्गमूलानि चन चनमूलाआदिस्वरूपं दृष्टंभवति तत्र
विपरीतंसर्वंराशिमानयेत् यस्ययोगेनसंचितंतदपचितेनैनैवनद्विगुणितंपूर्वराशिर्भवति एवमन्यक्रियास्वकार्यमि
ति उदाहरणं। कस्मिंश्चार्थगुणेत्रिलब्धेवर्गीकृतेतेनवोपेते पदमेकेनविहीनंरूपचतुष्कंभवेत्कथय सकोतु राशि
र्यस्मिंश्चार्थगुणितेत्रिभिर्भक्तेतमोवर्गितेनवभिः सहितेस्वमूलच्छिन्नेरूपविहीनेशेषंचत्वारोभवंतीतित्या

क॰ श्री॰ १००

सः। | गु | भा | व | हे | मू | शोध्यं | दृ | प्रश्नक्रमाद्युत्क्रमेण तथा गुणभागादि विलोमयेन रूपेण विपरीतं कार्यमिति दृ॰
| ५/२ | ३ | १ | ९ | २ | १ | ४ | शेषं ४ आसन्नेन शोध्येन रूपेण युक्तं ५ मूलेन वर्गितं २५ हेयेन ९ शोधितं १९

वर्गेण गृहीतमूलं ४ भागेन ३ गुणितं १२ गुणेन ५/२ भक्तं २४/५ एवं तथापि: अस्माद्दिमार्यद्दिनयगुणेन १२ त्रि

भिर्भागे ४ वर्गे १६ नवयोगे २५ मूलग्रहणे ५ रूपापचये ४॥ ॥ इति व्याख्यातो मिश्रकव्यवहारः प्रथ

मः॥ ॥ अथ श्रेढीव्यवहारस्यारभ्यते ॥ तत्रादौ श्रेढीव्यवहारे श्रेढीस्वरूपं तावदाह विस्तारो लाघवस्ता

दुपरि समसंख्याया यथा शरावस्य श्रेढी तेन स्तनयाय यथा पाशरावस्य मृत्पात्रस्याधस्तादूर्ध्वप्रवेशभागे लघुविस्ता

रस्ततः क्रमेणोपर्युपरि महान् विस्तारो भवत्येवं तद्धट्टस्य भूप्रदेशस्य सम्प्रेक्षे श्रेढीसंज्ञः हि समवतत्र श्रभेदमाध्यास्य

तेऽत्र विशेषस्य सन्निवेशोभिहितो भवति तथाहि तस्य भूजैनियमतः समा वा भवतां भूसुविस्तमियो विषमे।

एव अत एव श्रेढीगणितादभिन्नमेवास्य गणितं श्रेढीस्वेतत्फलं भूमुखयोगार्धं लम्बगुणितमिति क्षेत्रगणि

100

नेव भूवदनसमासार्धं मध्यमलंबेन संगुणितमिति न चानयोः सूत्रयोः सूत्रयोरस्ति कश्चिदर्थे फले वा भेदः किम
र्थं तर्हि क्षेत्रफले त्रगणितमारभ्यते भूमुखयोर्विहितनियमेन चावस्थापयिष्यमाणत्वाज्ज्ञातव्यं तेज्ञादिभिः पृथक्क
रणाज्ञाने कश्चिद्विहफलानयनार्थमितिशिष्यहितमाचार्यः सूत्रमारभते अथ किमर्थं भूमुखयोर्विहितनियमेन
व्यवस्थापनं पृष्टगच्छार्थेन एलंबे प्रतिहस्तमायुक्तपरनियमेनापद्यमानयतनरक्षणार्थं तेत्रफलं तु भूवदनसमा
सार्धेपि स्यात् प्रतिहस्तं न स्यात् ततस्तत्र गच्छसमलंबक इह लक्ष्यते आदिप्रचयात्मके क्षेत्रेऽस्मिन् लंबकस्ताव
द्गच्छसम एव नान्यथा कल्पनीयो भूमुखयोर्भुजवदित्याह ॥ गच्छसमो लंबकस्य भूमध्याद्वदनमध्यस्पर्शी सूत्रमि
ह लंबकः स च तस्य क्षेत्रस्य गच्छसमः पदतुल्यः यथाद्विके आदौ त्रिके प्रचये पंचके पदे क्षेत्रफले दत्तस्य ।
किं फलं भवति किंविध भूवदनभुजलंबकं च तत्क्षेत्रं स्यादिति पृष्टे लंबकस्तावद्कल्पितसिद्धिः पंचकप्रमा
ण एवेति ज्ञेयं इदानीमन्यक्षेत्रेभ्योस्य पृथक्करणहेतुं विशेषमाह ॥ लंबककरणे पृथक्पृथग्गिष्टादि चेयत

का॰ तत्फलं भवति लंबकस्य पंचकादिप्रमाणस्य दृष्टो लंबो यो भवति तत्र षष्ठ्यकृष्टयन्त्रस्य श्रेढीक्षेत्रस्य फलं भव
श्री॰ ति तत्र च क्षेत्रान्तराणामपि लंबे दृष्टस्य पो विभज्यमाने प्रतिदृष्टं क्षेत्रफलं विद्यते सर्वं रहस्यं त्रिंशदि च येन शेषवि
१०२ शेषः प्रथमे लम्बदृष्टे त्र्यादिसंमितमेव क्षेत्रफलं द्वितीये सप्तचयादिसंमितं तृतीये द्विगुणप्रचयप्रयुतादिसंमि
तं चतुर्थादौ त्रिगुणादिप्रचयप्रयुतादिसंमितमिति एतच्चाग्रे दर्शयिष्यते॥ इदानीं क्षेत्रस्वरूपरचनामाह
तद्रूपं स्वमितिसिद्ध्यै करणमहं संप्रवक्ष्यामि॥ तस्य श्रेढीक्षेत्रस्य भूमुखवेधाः परिमाणं साधयितुं कर्म संप्र
वक्ष्यामि तत्सिद्धा भुजयोरन्तसिद्धेः लंबस्य च साध्यत्वात्। तदाह। पदमेकं उ लंबस्य यद्दलहीनं मुखं यदा
भवति स च यासामन्याहृत्त्वं यद्यपि पंचकादिकं पदं प्रास्मिकोऽके भवति तथापि तत्पदं रूपमेव गृहीत्वं
तस्मिन् गृहीते गच्छसमे लंबकस्ते सति न्यायेन रूपमेव लंबोऽपि ग्रहीतव्यस्तावति क्षेत्रस्वरूपकरणार्थः त
त्वारंतं च एकैवा तत्र पदेषु स्वरूपव्यवस्थानात्। तत्र प्रथमपदे क्षेत्रे चयस्य दले तद्धीनं मुखं यदा भवति तद्यथा

101

चयस्य त्रिकस्य त्रिकस्य दलेनार्धेन मुखे विहितं कं हीनमर्धं भूर्भवति सापव भूस्थयेन सहिता प्रथमपदस्ते त्रस्य

वक्रं स्यात् यथा सैवार्धिकी भूस्थपेन त्रिकेन सहितार्धचतुर्थप्रमाणं वक्रं कुर्यात्सूत्रेण तच्चिह्नं

यावं लम्बा यावती भूर्यावच्च वक्रं तावत्सूत्रेण तच्चिह्नं कुर्यात् अभिमतदि क्रमेण प्रागपरायते

क्षांकिके लंबसूत्रं निपात्य तस्मात् तद्वये चिह्नं कुर्यात् ततः पश्चिमचिह्नं मध्ये क्षेत्रादक्षिणोत्तमा।

र्धिकं भूसूत्रं प्रसार्य तस्मात् तद्वयेपि चिह्नं कुर्यात् ततश्च प्राकू चिह्नं मध्ये क्षेत्रादपदक्षिणायत

२	व
	कं
१	ल
१	प
२	श

मर्धं चतुर्थप्रमाणं मुखसूत्रं प्रसार्य तस्मात् तद्वयमपि चिह्नयेत् प्रतिसूत्रं रेखापर्व वा कुर्यादिति प्रयोगः


भूमुखरेखाग्रस्य क्षारयेत्सूत्रं मुभयतो बाहू भूरेखाया दक्षिणान्मुखरेखाग्रे दक्षिणा यावत्सूत्रं प्रसार

ये देष दक्षिणो भुजः ततो वामाङ्गरेखाया वामभेव मुखरेखाग्रे यावत्सूत्रं प्रसारयेदेष वामो भुज इति लंब

भूवदनभुजनियंत्रित प्रथमपदक्षेत्रफलीसेत्रं सन्निवेशितं सत्स्वर्गतो भवति अपवादस्तु सूत्रप्रसक्तिर्वज्र

का॰ वृत्तगगतभूमौ भवेदित्थम् व्यस्तदलब्धेन सूत्रेण यामवतीति कर्मणा साधितायाभुजज्ञानात्मकत्वे जाते स।
श्री॰ तिसपदद्वास्ति कोलंबकः सपदयरासूत्रपातः सपद वक्रसूत्रविन्यासः भुजसूत्रमेवतन्यथा भवति भूरे
१०२ खायाहृत्तिणहामेसु खरेखाग्रं यावन्नीत सूत्रमुपरि अग्रे वामो भुजो जायते अथ यस्याग्रे दक्षिणो भुजो जाय
ते वामभूसूत्रायामदक्षिणवक्रसूत्रप्रांते नीतसूत्रमुपरि अग्रे दक्षिणो भुजः अथ यस्याग्रे वाम भुजो जायते
102 पवेसति अग्रहृयात्मके श्रेढीदेशे भवति इदानीमस्मिन् त्रणगतभूमिवपाहृज्यवक्रभुजसूत्रपातजनित
अग्रहृयात्मके श्रेढी विशेषे सहा स्थितो कोलंबस्याग्रयोर्विभज्यते उपरि अग्रे लंबो भूमिनिरहितेन भा
जितं वदनं सवयासास्याद्वक्रमिति कर्मणा साधितं वदनं स्यान्मनैव स्वपरिमाणरहितेन भाजितं सद्यपरि
स्थिते अग्रे लंबो भवति वक्ररेखामध्यात् भुजसूत्रसंपातस्थानेयावत्ततः प्रभृति भूरेखामध्यं यावत्तत्स्थ
स्याग्रलंबो भवति तस्याकरणं । नृपातत्स्यापगमे यस्याग्रे जायते लंबः तस्योपरि अग्रसमसंधितो लंबस्य

पादूद्वैशिष्टमयस्तनद्य लंबकप्रमाणं भवति इत्यं प्रथमपदे हास्तिकलंबेयनर्णविभागेन भुजभेदाद्धि।
विधेश्रेढीक्षेत्रं हस्तापरपदावधिके क्षेत्रे कथं कार्यमित्याह इत्थं श्रेढीक्षेत्रे कृते ऐलंबके उत्पन्नं कल्प्यं इष्टा
वि लंबगुणितं यत्तेन सूत्र्वमवनियुग्दलं अनेनप्रकारेण हास्तिकलंब श्रेढीक्षेत्रं विस्वव्याभिमते पंचका
दि लंबके समस्तश्रेढीक्षेत्रसंबंधि वदनं साध्यं सर्वयायराहास्तिकश्रेढीक्षेत्रसंबंधि वदनं तत्संबंधि सेवय
स्याद्भनमीप्सितलंबगुणितं तस्मागनीत भूमप्रमाणेन युतमिष्टलंबक श्रेढीवदनं भवति तदत्र भूमिर्यैव
प्रथमपदश्रेण्याः सैव पादांतरेण लंबान्यथात्ववदनप्रमाणभेदः प्रवर्त्तनपर्वति क्षेत्रप्रकल्प्यैतानीमा
सुन्ततरिकायाः क्षेत्रगतेर्भेदेन गणितमाह ख्येकपदार्थघ्नचयः साध्यः पदसंगुणोभवेद्गणितं श्रेढी
क्षेत्रेतुफलं भूसार्वयोगार्धलंबहतिः विरूपस्यपदस्यार्धेन हतश्चयः आदिना सहितः पदेन संगुणितः सं
कलितं भवति तथा भूमेर्मुखस्यच योयोगस्तदर्धस्य लंब सर्वयातः श्रेढीक्षेत्रफलं भवति किमाद्युत्तरप

क॰ दशहस्तेनीदमितिनयज्ञायनेकेवलंतत्र्यश्रेष्ठीक्षेत्रमित्येवज्ञायनेस्तायमानभूवदनलंबेनदानव्येकपदेता
खी॰ दिनासिद्धिरस्तीतिलक्षणांतरारंभः यथाप्रश्नः त्र्यादित्रिचयश्रेढ्यांकिंगणितंपंचकेपदे यस्यांश्रे
१०३ ढ्यांप्रथमपदंद्वौहस्तौक्षेत्रतः द्वितीयपदं पंचतृतीयपदमष्टौचतुर्थपदमेकादशपंचमपदंचतुर्द
103 शास्याश्रेढीसमस्तास्तेत्रतः कियतःप्रमाणमितिन्यासः आ २ उ ३ पद ५ अत्रपदमिदं पंच ५ व्येके ४ अ
स्यार्धं २ एतेनचयोयंत्र गुणितोजातः ६ आदिनानेन २ युक्तः ८ पदेनानेन पगुणितइतिलब्धं फ
लं ४० एतेराद्युत्तरपदैः कीदृक्क्षेत्रंभवतिपदमेकं नलंबइतिलंबोहस्तः १ चयस्यास्य ३ दलं ३/२ |
एतेनस्वावमिदं २ हीनं १/२ | एषाधराएषाचयेनानेन ३ युक्तावक्त्रं ७/२ | भूश्चवेत्यादिनाअजला
भः एतस्याक्षेत्रन्यासः

अस्यास्तिकक्षेत्रस्यैतेत्रफलंभूमुखयोगः ४ अर्धं २
लंबेन १ एतद्गुणितंतदेव २ अ प्रथमपदेऽन्तराभावादादिरेवफलमिति एवंद्वास्तिक

तेत्रकल्पनायथावदनं ३/१ परया १/१ ऊनं २ इष्टावलंबकेनानेन ५ गुणितं १५ भ १/२ युतं ३१ न्यासः ३१ मु / ५ लं / १५ भू

भूमुखयोगः १९ अर्थं ८ लंब ५ हतं ४० अपरः प्रश्नः॥ अर्थैव द्यादित्रिच येष्टे ३/२ न्यासः

किंगणितमर्थपदेन्यासः आ २ उ३१५। १/२ कर्मपदं १/१ रूपेण १ हीनं विसदृशछेदत्वाछेदनमछेदनस्य

रूपं स्यादितिरूपस्यरूपे छेदनेकृते तत्त्व नभागजातौ छित्वाछेदेनेत्यादिना छेदसादृश्यैकर्मणिजातं १ २ / २ २

अर्थाद्यो हि छेदो पातयितव्यावयिकत्वान्नपतनशक्तियावत्त भवमर्थमेवसंशोध्यायराशेः शोधितेव्यय

राशिवर्धमवशिष्यतेतत्त्वयुश्येयाववियहूनेभ्योवियोगस्तद्विपर्ययइतिपतनात्मकेसद्विपर्ययाहृणंजायते १ + / २

इयतिकृतेजातंत्वेकइति तस्यार्थं ४ चयेन २ गुणितं ३/४ आदिः २ यनेनयुतमितिविसदृशछेदत्वाछेदनम

छेदनस्यरूपस्यादितिरूपेहयस्य रूपेछेदनेकृते तेल्यनभागजातौ छित्वेत्यादिनाछेदसादृश्यकर्मणि

जातं ३/४ ८/४ | अनयोर्योगेकार्येतयोर्योवियोगः स्यादितिऋणस्यधनाद्विशुद्धौजायते ५/४ | इयताकृतेजातं सादिः

क॰ पदेन १/२ गुणितं ५/२ पतङ्गुणितं अत्रैव क्षेत्रकरणं पदमेकेन तल्लंब इति लंबः १ चयस्यास्य २ दलेन १/२ गुणं वर ही
ली॰ नमिति आख्यवत् यथा १/२ पषेवचयेन २ भूमिः सहिता १/२ पतद्धकं ऊर्ध्वान्तरेणनत्रिकमित्यादिप्राख्यवत् य
१०४ नोत्पत्तिकत्वान्नत्रयस्तुतिर्वज्रवदित्यादिनास्ति इत्यहा्लिकक्षेत्रतोक्षेत्रन्यासः ३/१ अथार्थिकक्षेत्रस्वना य
योनसुत्व २ इष्टावलंबेन १/२ गुणिते १/२ अवनिमुक्तं २ पतद्धकं न्यां | २/२ ले १/२ पा १/२ | १/३ सः | २/२ ले १/२ पा | अतः ते
त्रफलं भूमुत्वयोगः ५/२ अस्यार्थं ५/४ लंबेन १/२ गुणितं ५/८ अत्र | भवते यद्य | नयोर्वा
मुखयोर्हालिकक्षेत्र फलं ५/८ पद्धयं नहि आर्थिके द्वे | णभावत्वकथं | पंचाष्ट
भागा इतितत्रार्थन्यासः यदीयं हालिकं क्षेत्रं समचतुरस्राद्युच्यतेनतदर्धे आयतचतुरस्रेतदर्धेफलं
इदं च क्षेत्रं पारावाह्वतिसर्वत्र पव हालिकं पृथक्पृथक्प्रमाणभूवदनभुजे तस्मादस्य प्रथममर्थमलंपहिती
येन विपुलमिति कृतानयोः समाशाता तथा च प्रथमार्थस्य यद्धकंतद्भन्नरार्थस्य भूमिः २ वक्रं १/२ लंबः १/२

इतिविस्तारस्तावद्रूपचितएवक्षेत्रफलंच भूमुखयोगस्यास्य ११/२ अर्थं ११/४ लंबेन ६/१ गुणितं ११/८ प्रथमार्थ-
फलस्यास्यचयोगोहास्त्रिकफलमेवंरूपद्वयं पंचराशिकं चात्र प्रत्ययनिबन्धनम स्ति अर्थभु-
वोर्थचतुर्थवक्रस्वरूपलंबस्यक्षेत्रस्ययदिरूपद्वयंक्षेत्रफलंतदार्थभुवोर्हिवक्रस्यार्धलंबस्यकिमिति
भूवदनेसमस्यन्यासः

ने / ल	पद / १ब	२५ भू / मु
	२फ	१/२ ल

नीतेफलेन्यपक्षमित्यादिनालभ्यते ५/८ द्वितीयप्रथमार्थेक्षेत्र-
फलं अथापरंपंचरा-
शिकं अर्थभुवोर्धचतुर्थवक्रस्वरूप लंबस्यफलंयदि-
द्वौतद्विभुवोर्धचतुर्थ
वक्रस्यार्धहस्तलंबस्यकिमितिभूवदनेसमस्यन्यासः

४	११/२
१/२	१/१

नीतेफलेन्यपक्षमित्यादिनालभ्यते द्वितीयार्थेक्षेत्रफलं ११/८ तदेवंक्षेत्रस्वरूपवशादर्थयोःफल-
वैषम्यं अतएवराशिगतेगणितान्तरेवदन्ति निर्विकल्पपदं अथचयइत्यादिन्यासः आ २ उ ३ ग १
निर्विकल्पंपदं अनेनचयः १ गुणितः सैकगणेनविनचवमेवेतिभवति आदिना २ सहितः सेपस ३/१ मं

11

कु॰ त्वेयोगे इति भवति २ यथो॰ नष्टसंज्ञोग्रे उद्देष्टप्रमाणे द्वितीयस्थाने स्थाप्यः एषएव चमुत्वेन २ प्रत्वितः ध
श्री॰ चयेन २ विहीनः १ निर्विकल्पपदे॰ अस्यार्थं शून्यमेव ततः संगुणनेखेन चात्वमेवेति शून्यमेव॰ विकलं $\frac{१}{२}$
१०५ एतेन गुणितं उपरि द्वितीयस्थाने स्थापितो नष्टसंज्ञको राशिः रूपद्वयं २ जातं रूपमेकं १ एतद्गुणितं
105 समग्र प्रथमपदस्य रूपद्वयस्यार्थं रूपमिति अथापरः प्रश्नः। पंचोत्तरद्विकादेः पंचमभागो पदैकपर्यय य
स्याः प्रथमं पदं रूपद्वयप्रमाणं उत्तराणि पदानि यथोत्तरं पंचप्रचयानि पंचमो भागः पदं स्याश्रेढी समग्रपदस
मासेन किं फलं भवतीति कथय न्यासः पदं $\frac{१}{५}$ वोकमिति रूपं सवर्णितं $\frac{५}{५}$ न पतनीति विपरी
तमुद्ध्याव्ययराशिशेषकष्टगुणनमकोति एते $\frac{४}{५५}$ तस्यार्थं $\frac{२}{५}$ + चयेन ५ गुणितं गुणपश्चगुण
कयोः छेदांशापवर्तनात् २+ आदिना २ युतमिति सम यनर्णयोगे शून्यं जायते॰ एतत्पदेन $\frac{१}{५}$
संगुणितं शून्यमेव॰ नास्ति क्षेत्रफलमत्रेति तत्किमितिचेत् ननु गणितमेवात्र प्रमाणं एवंविधे स्थानु

आ	उ	ग
२	५	$\frac{१}{५}$

गच्छपदेषु गणितं शून्यमेव भवति तथा शून्यात्समादाद्यादयस्तत्र एवायांति यथाद्यावज्ञाने तदानयनार्थो न्यासः

आ	३	ग	फ
·	५	१	·

आदिः पदहृतगणितमित्यादिना करणं तत्र गणितं शू॰ पदेनानेन १/५ हृतं शून्यमेव निरे
कगच्छेन ५/५+ हृतस्याचयस्यास्य ५/१+ दलेन २+ ऊनमिति वियोगे सति संगमपदवशू
न्ये रूपद्वये हिमेव पदद्वयं २ अनेन ज्ञाते तदानयनार्थो न्यासः | आ २ | ३ · | ग १/५ | फ · | पदहृतफ
लं मुखोनमित्यादिना करणं फलं॰ पदेन १/५ हृतं शून्यमेव॰ मुखेन २ ऊनं ऋणयोग वियद्गुणे ऋ
णो वियोगस्तु हि पर्यय इति जातं २ नि रेकस्य पदस्य ५/४+ दलेन ५/१+ हृतं विधिः पूर्व इति प्रश्नस्त्वन्नः।
६/२+ वेशेषा योरपवर्तने ऋणयोस्तथनं भवतीति लब्धमुत्तरमानं ५ अथ पदज्ञाते
न्यासः | आ २ | ३ ५ | ग · | फ · | अष्टोत्तरहृतफलतश्चाद्यादिना करणं फलं॰ अष्टहृते॰ तथोत्तरेण ५ हृते॰
आदिः २ हिचत्र ४ अस्य च प्रचयस्याचास्य ५ विवरं १ अस्य हृतिः १ अनयायुक्त

क॰ मितिजातं १ अस्मान्मूलमिति १ मुखेन २ खण्डेन ४ कृतमिति यावत्तस्मिन्वेष्टे व्ययराशिकरणी ३+ चयेन ५
श्री॰ सहितं धनर्णगमाजातं २ द्वाभ्यां भक्ते १ तथा चयेन ५ भक्ते १/५ पक्षगच्छः अथाद्युत्तरयोरव्यक्तयोरुक्तमिश्रेस
१०६ मकेत्यानेन्यासः आद्युत्तरयुतिः ७ गः १/२ फलं शून्यं ० विपदव्यदवर्गेत्यादिना कर्मपदं १/५ वर्गः १/२५ पदेनहीने
सवर्णनेकृत्वा यावत्तस्मिन्वेष्टे व्ययराशिशेषकरणी ४+/२५ दलं २+/२५ मिश्रेणगुणितं १४/२५+ फलशून्येनही
ने १४/२५+ पदं १/५ योके ४/५+ दलं २/५+ योकेधनर्णग त्याः २/५ यतन्नामापतं २४/२५+ पदं १/५ नाहतं २/२५
अनेनपरिशिष्टे १४/२५+ छेदांशविपर्यासे इति भक्तं जातं ५ पक्षआदिः पतेनेवमिश्रेति सूत्रे शेष
५ पक्षउत्तरः तस्मात्काकुतोपपत्तिर्यदि शून्यमेव फले स्यात् सत्यमेतत् किन्तु यत्र रूपादिकमादिरस्ति उ
त्तरं च नाभाव स्वभावे पदं च वस्तु सत्तात्मकं तत्र यत्नेन किंचिदिति विचित्रमिति प्रतिभाति यदिहि रूपतः न
त्वात्पदस्योत्तरसंयोगेनास्तिनापि प्रथमपंयोग इति प्रमाणतानत्व प्रथमयदस्य नांशोपिकेन भक्तिः प्रथ

मपदं राशित्वादेवगच्छः राशिगतकृतं चैव विधेविषये पंचाशपदस्य फलमायात्येवं द्वौ भागौ क्षेत्रगतद्व
यौ न स्वस्य उपपत्त्या संविनाकथं वा सन्नान्वेषिणोषिणोऽवस्तुगतिसंवादात्स्वादमलव्यवचमत्कारमासाचयंति
